॥ श्रीः ॥

भगवत्पादभाष्यरससाररूपोऽयम्.

अनुभाष्यगांभीर्यग्रन्थः.

सर्वतन्त्रस्वतन्त्रभगवत्कलावतार श्रीमदश्वत्थनारायणशास्त्रिणां

पौत्रेण

महामहोपाध्याय रामसुब्रह्मण्यशास्त्रिणा

विरचितः

महाराजराजमान्यराजश्री

कोडियालं रङ्गस्वाम्यय्यङ्गार् संज्ञकसुहृद्भिः

चेन्नपुर्यां

आर्. वेङ्कटेश्वरसभाध्यक्षप्रतिष्ठापितानन्दमुद्राशालायां

मुद्रितस्सन् विजयतेतमाम्.

1912.

॥ हरिः ॐ ॥

श्रीरामाय नमः

अनुभाष्य गाम्भीर्यम्

श्रीदेवी यस्य भार्या खगपतिगरुडो यस्य वाहः फणीन्द्रः
शय्या यस्याङ्घ्रिलग्ना विधिमुखविबुधा यस्य नाभौ सरोजं।
यस्य श्रीमुक्तसङ्घैः परिचरणविधिश्शाश्वतस्सुप्रसिद्ध-
स्सोऽयं रामाख्यविष्णुर्मम दिशतु सुखं मङ्गलं मङ्गळानाम् ॥

तत्तद्भाष्यमतस्थैर्यैर्दोषाश्शाङ्करैकथिताः।
ते शाङ्करभाष्याब्धेर्दूरे तिष्ठन्ति न स्पृशन्त्येतम् ॥

इत्येतद्विशदयितुं मतिरेषा वै ममाधुना जाता।
रघुमण्डनसंस्मरणं हेतुस्तस्यां ममास्ति सततं हि ॥

श्रीरामसुब्बविदुषाभष्यगाम्भीर्यवर्त्मना।
भगवत्पादभाष्यार्थो रूप्यते तत्त्वदर्शिना ॥

'वैलक्षण्याच्च न स्वप्नादिवत्' इति सूत्रे भगवत्पादभाष्यं– वैधर्म्यं हि भवति स्वप्नजागरितयोः किं पुनर्वैधर्म्यं बाधाबाधावि- ति ब्रूमः बाध्यते हि स्वप्नोपलब्धं वस्तु प्रतिबुद्धस्य नचैवं जागरि- तोपलब्धं स्तम्भादिकं कस्याञ्चिदवस्थायांबाध्यते-इति।तेन भाष्ये ण स्वप्नोपलब्धवस्तुनः बाध्यत्वरूपमिथ्यात्वं, जाग्रत् प्रपञ्चस्य

स्तम्भादेः बाध्यत्वरूपमिथ्यात्वविरुद्धमबाध्यत्वंच स्पष्टमु
क्तम्।नच-उक्तभाष्यं व्यवहारदशायांजाग्रत्प्रपञ्चस्याबाध्यत्वपरं,
न मुक्तिदशायाम्-इति शङ्क्यं, 'कस्याश्चिदवस्थायां बाध्यते इत्यत्र
'कस्याश्चित्'इत्यवस्थाविशेषणस्वारस्येन अवस्थात्वावच्छिन्नान्त-
र्गतमुक्त्यवस्थायामपि बाध्यत्वप्रतिषेधात्।अन्यथा कस्याश्चिदिति
अवस्थाविशेषणवैयर्थ्यापत्तिः । नच-मुक्तेरवस्थात्वाभावादुक्त-
भाष्येण तत्र प्रपञ्चस्य न बाध्यत्वनिषेधसिद्धिःइति शङ्क्यम्-एवं
मुक्तिफलानियमस्तदवस्थावधृतेः' इति सूत्रीयेण - ब्रह्मैव हि
मुक्त्यवस्था-इति भाष्येण मुक्तेरप्यवस्थात्वोक्तेः । नैवं जाग्रत्
प्रपञ्चो बाध्यते इति प्रस्थानत्रयभाष्ये कुत्रापि स्पष्टवाक्यमस्ति,
येन जाग्रत्प्रपञ्चस्य बाध्यत्वमपि भाष्यकृताम् अभिप्रेतं स्यात् ।
बाध्यत्वसूचकं परम्'ऐन्द्रजालिकवत्,मरुमरीच्युदकादिवत्,स्वप्न-
वत्'इत्यादिवाक्यं भाष्ये तत्र तत्र वर्तते;स्पष्टवाक्यविरोधे सूच-
कवाक्यानां किञ्चित्किञ्चित्सादृश्यादिना नेयत्वम् उचितम् ।
अत एव समन्वयाधिकरणभाष्ये 'एकत्वे हेयोपादेयशून्यतया
क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः, नहि ब्रह्मैकत्वज्ञानेनो-
न्मथितस्य द्वैतविज्ञानस्य पुनस्सम्भवोऽस्तिइति'भाष्यम्;आरम्भ-
णाधिकरणे'परमार्थावस्थायामीशितेशितव्यव्यवहाराभावः प्रदर्श्यते'
इति भाष्यं;'स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि'इति सूत्रे
'तयोः सुषुप्तिमुक्त्योः अन्यतरावस्थापेक्षमेतद्विशेषसंज्ञाभावव-
चनम्'इति भाष्यम्;एतैर्भाष्यैः ब्रह्मसाक्षात्कारात् मुक्त्यवस्थायां
द्वैतविज्ञानस्य द्वैतव्यवहारस्य द्वैतविशेषविज्ञानस्य च नाशः क-
थितः ; नतु ब्रह्मज्ञानात् द्वैतस्य विनाशः । तस्मात् द्वैतस्य न

धिकभेदश्चसिध्यति-एवं परममुक्तावपि कालोस्त्येव-भोगेनत्वित
रेक्षपयित्वा संपद्यतइति-सूत्रइतरे आरब्धकार्येपुण्यपापे उपभो-
गेनक्षपयित्वा ब्रह्मसंपद्यते तस्य तावदेवचिरंयावन्नविमोक्ष्ये अथ
संपत्स्यइतीति भगवत्पादभाष्याभ्यां तथात्वावगमात्-सूत्रतत्
भाष्यगतेन त्वा प्रत्यये न प्रारब्धपुण्यपापक्षपणाक्रिया ब्रह्मसं-
पत्तिरूपमुक्तिक्रिययोः पूर्वोत्तरकालवृत्तित्वावगमात्-समानक-
र्तृकयोः पूर्वकालइतिस्मरणं । सूत्रविषयश्रुतौ यावन्तावदथशब्दैः
उक्तक्रिययोः कालसंमन्धावगमात् - कालसंबन्ध्येवमुक्तिरिति
प्रारब्धकर्मक्षयोत्तरं मुक्तब्रह्मणोः संपत्तिक्रियायां कर्तृकर्मभा-
वनिर्देशात् तयोः मुक्तावपिभेदः कर्मकर्तृव्यपदेशाच्चेति सूत्रत-
द्भाष्यरीत्यासिध्यति - तादृशभेदसिध्यर्थं मुक्तावपि उपाधिसंब-
न्धो भगवत्पादाभिप्रेतइति निष्प्रत्यूहं । एवं ममैवांशो जीव-
त्तलोकइति श्लोकस्यभाष्यं - यथाजलसूर्यकः सूर्यांशो जलनिमि
त्तापाये सूर्यमेवगन्त्वाननिवर्तते तथा अयमप्यंशः तेनैवात्म-
त्मना सङ्गच्छति यथा वा घटाद्युपाधिपरिच्छिन्नो घटाद्याकाशः
आकाशां शः सन् घटादिनिमित्तापाये आकाशं प्राप्य न निव-
र्तत इत्यस्ति-तत्र भाष्ये दृष्टान्तभाग एव उपाधिनाश उक्तः न
दार्ष्टान्तिकभागेपि तस्मान्मुक्तावप्युपाधिसिद्धिः-एवं फलाध्या-
ये चतुर्थपादे एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायण
इति सूत्रं तस्य च पारमार्थिकचैतन्यमात्र स्वरूपाभ्युपगमेपि
व्यवहारापेक्षया पूर्वसिद्धस्याप्युपन्यासादिभ्योपगतस्य ब्राह्मस्य
ऐश्वर्यरूपस्याप्रत्याख्यानादविरोधं बादरायण आचार्यो मन्यत
इति भाष्यं । तस्मिन् भाष्ये पारमार्थिकचैतन्यमात्र स्वरूपाभ्यु-

पगमेपीत्यत्राभ्युपगमोत्तरापि शब्देन यद्यपि स्वाभाविकींचि-
न्मात्ररूपतामुक्तस्य नास्ति तथापि औडुलोमि श्रद्धानुसारेण
स्वाभाविकीं चिन्मात्रतां बादरायणोङ्गीकृतवानिति प्रतीयते–
साङ्ख्याधिकरणे अभ्युपगमेप्यर्थाभावादिति सूत्रीयाभ्युपगमे-
पीति पदव्याख्यानरूपे स्वाभाविकी प्रधानस्य न प्रवृत्तिरिति
स्थापितं । अथापि नाम भवत श्रद्धामनुरुद्धमानाः स्वाभावि-
कीमेव प्रधानस्य प्रवृत्तिमभ्युपगच्छेम तथापीति भाष्ये अभ्युप-
गमोत्तरापि शब्दरूपपदविवरणे अनभ्युपेताभ्युपगमस्यैव अ-
भ्युपगमोत्तरापि शब्देन स्पष्टं कथनात् - प्रकृतेपि अभ्युपगमे-
पीति भाष्यगत शब्दस्वारस्येन मुक्तस्य निर्विशेषचिन्मात्रत्वे
भाष्यकृतां परमतात्पर्याप्रतीतेः । उक्तभाष्ये मुक्तप्राप्ये ऐश्वर्ये
ब्राह्मणस्येति अनेनविशेषणेन मुक्तब्रह्मो भयानुगत मैश्वर्यमव-
गम्यते । तेन च मुक्तब्रह्मणोः भेदोप्यवगम्यते । अभेदे तस्यै-
व तदीयमैश्वर्यमित्युक्ति वत् असाङ्गत्यापत्तेः ऐश्वर्यप्रतियोगित-
या ब्राह्मस्येति पदनिर्दिष्टब्रह्मणः ऐश्वर्यानुयोगिमुक्तस्य च भे-
दोवश्यं भाव्येव–परस्परभिन्नज्येष्ठ कनिष्ठोभयस्वामिकधनेक-
निष्ठस्येदं ज्येष्ठीयमिति वत् मुक्तैश्वर्ये ब्राह्मेणेति सूत्रब्राह्मस्यै-
वैश्वर्यस्येतिं–भाष्ययोः ब्राह्मत्वनिर्देशात् ब्रह्ममुक्तयोः भेदः
स्पृटः अन्यथा मुक्तब्रह्मणोर्भेदाभावे चैत्रीयमिदं चैत्रीयमित्य-
स्यापि संप्रतिपन्नत्वापत्तेः तस्मात् एवमप्युपपन्यासादिति सूत्र-
भगवत् पादभाष्यं मुक्तिदशायामपि मुक्तजीवब्रह्मणोः औपा-
धिकं भिन्नत्वमस्तीति सूचयतीत्यलम् ॥ श्रीः ॥

एतेन प्रलयसामान्यात् शक्त्यवशेषताप्रसक्तौ ब्रवीति अ-
विभागापत्तिरेवेति।कुतः?वचनात्।तथाहि कलाप्रलयमुक्त्वावक्ति-
भिद्येतेतासां नामरूपे पुरुष इत्येवं प्रोच्यते सएषोकलोमृतो भवती
ति अविद्यानिमित्तानां कलानां विद्यानिमित्ते प्रलयेन सावशेष-
तोपपत्तिरिति अविभागो वचनादिति सूत्रभाष्यं षोडशकलान्तर्ग-
तमनसोऽपि निरवशेषलयं कथयति।तत् कथं जीवोपाधिमनसःमु-
क्तौ सत्वमिति परास्तं प्रश्नोपनिषद्भाष्ये षोडशकलाप्रलयबोधक-
पदस्य अस्तं गच्छन्तीत्यस्य अदर्शनं गच्छन्तीतिविवरणात् कला-
विषयकदर्शनसामान्याभावस्यैवनिरवशेषलयरूपताभाषणात्स्व-
रूपनाशस्वीकारे तत् भाष्यविरोधापत्त्या त्वदुक्ताविभागोवच-
नादिति भाष्यमपि दर्शनाभावमेव कलानां निरवशेषलयइत्येतत्
परमेव । अन्यथाभाष्ययोः विरोधापत्तेः। अस्तं गच्छतीत्यत्र
अस्तंगमनस्य सूर्यः अस्तं गच्छतिइति वत् अदर्शनगमनार्थत्वस्यै-
व न्याय्यत्वात्। अन्यथा सूर्यास्तमयेऽपि सूर्यस्वरूपनाशापत्तेश्च।
ननु जीवब्रह्मणोः स्वाभाविकभेदपक्षापेक्षया तयोः मुक्तिदशाभा-
व्यौपाधिकभेदपक्षे को विशेष इति चेन्न स्वाभाविकभेदपक्षे द्वासु-
पर्णेत्यादिभेदशास्त्रं मुख्यं तत्त्वमस्याद्यभेदशास्त्रं जीवब्रह्मोभयानु-
गतधर्माभेदाभिप्रायमिति गौणं–मुक्तिदशाभाव्यौपाधिकभेदपक्षे-
तु संसारदशायामिव स्वरूपाभेदस्य मुक्तिदशायामपि सत्त्वात्
तत्त्वमस्याद्यभेदशास्त्रं मुख्यं - भेदशास्त्रं तु औपाधिकभेदविषय-
तया गौणमिति विशेषसत्त्वात् अत एव मत्कृतभगवत्पादभाष्य
गाम्भीर्यग्रन्थे चतुर्दशपृष्ठे पञ्चमपङ्क्तौ स्वाभाविकभेदे भगवत्पा-
दाभिमतत्वं तत्रैव विंशतितमे पृष्ठे प्रथमपङ्क्तौ औपाधिकभेदे भगव-

त्पादाभिमतत्वमुक्तं नानुपपन्नमित्यलं - एवं मुक्त्यवस्थायां मुक्तः
स्वीयसुखाश्रयः स्वीयसुखावभासर्वांश्चाङ्गीकार्यः - मुक्ताव -
स्थायामप्यविद्याध्वान्तं विद्याप्रदीपेन विधूयात्मैव केवलो नि-
र्वृतस्सुखी भवतीति यथाच तक्षोभयथेतिसूत्रभाष्ये अविद्यानिवृ-
त्तिमतो मुक्तस्य सुखीति सुखाश्रयत्वनिर्देशात्-सुखस्यज्ञातैकस-
त्ताकत्वस्य भावत्वेन स्वीयसुखानुभवोऽपि मुक्तस्यास्तीत्युक्तभा-
ष्यादेव प्रतीयते-तस्मात् मुक्तौ भगवत्पादमते निरतिशयस्वीय-
सुखानुभवोऽस्तीति मोक्षस्य सुखानुभवस्य सर्वाभिलषितस्य सि-
द्धिरित्यलम् ॥

ब्रह्मच द्विविधं निर्विशेषं सविशेषञ्च। निर्विशेषत्वन्तु आ-
विद्यकस्थूलत्वाणुत्वदीर्घत्वह्रस्वत्व शब्द स्पर्श रूप पाप जरा शो
कादिधर्मरहितत्वं - नतु धर्मसामान्यशून्यत्वं। सगुणत्वन्तु मनोम-
यत्व प्राणशरीरत्वभारूपत्वाद्याविद्यकगुणयुक्तत्वं । निर्विशेषस्य
ब्रह्मणः परमिति निर्गुणमिति प्रधानमिति ज्ञेयब्रह्मेति शुद्धमि-
त्यादि संज्ञा।सविशेषब्रह्मणः अपरब्रह्मेति सगुणमिति शबलमिति
अप्रधानब्रह्मेति सोपाधिकं ब्रह्मेति संज्ञा उपास्यब्रह्मेतिच-अत्रा-
र्थे प्रमाणं किंद्वे ब्रह्मणी परमपरञ्चेति बाढं द्वे-एतद्वै सत्यकामपर-
ञ्चापरञ्च ब्रह्मयदोंकार इत्यादिदर्शनात्-किंपुनः परं ब्रह्म किमप-
रमिति - उच्यते! यत्राविद्याकृतनामरूपादिविशेषप्रतिषेधेन अ-
स्थूलादिशब्दैः ब्रह्म व्यपदिश्यते तत् परं तदेव यत्र नामरूपादि-
विशेषेण केनचिद्विशिष्टमुपासनायोपदिश्यते मनोमयः प्राणशरी-
रोभारूपइत्यादिशब्दैस्तदपरमिति। नन्वेवंसति अद्वितीयश्रुतिरूप-
रुद्धचेतन-अविद्याकृतनामरूपोपाधिकतया परिहृतत्वादिति कार्य

बादरिरित्यधिकरणान्तभगवत्पादभाष्यमेकं तथात्रवाजसनेयके श्रू-
यते-एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वदीर्घमि-
त्यादि-तथा आथर्वणे श्रूयते-अथपरायया तदक्षरमधिगम्यतेयत्त-
दद्रेश्यमग्राह्यमगोत्रमवर्णामित्यादि - तथैवान्यत्रापि विशेषनिरा -
करणेनाक्षरं ब्रह्म श्राव्यते इत्युपक्रमकं तथाचानन्दादयः प्रधान-
स्येत्यत्र व्याख्यातं तत्र विधिरूपाणि विशेषणानि चिन्तितानि
इह प्रतिषेधरूपाणीति विशेषप्रपञ्चनार्थश्चायं चिन्ताभेद इत्यक्षर-
धियामविरोध इति सूत्रभाष्यं एकं ब्रह्मस्वरूपप्रतिपादनपरासु
श्रुतिषु आनन्दरूपत्वं विज्ञानघनत्वं सर्वगतत्वं सर्वात्मत्वमित्येवं-
जातीयकाः प्रधानस्य ब्रह्मणो धर्माः सर्वे सर्वत्र प्रतिपत्तव्याः। त-
स्मात् सार्वत्रिकत्वंब्रह्मधर्माणामिति आनन्दादयः प्रधानस्ये -
ति सूत्रभाष्यञ्च प्रमाणम्। नचोदाहृतभाष्योक्तानां प्रधानज्ञेयनि-
र्विशेषब्रह्मगतानामुपलक्षणविधया निवेशश्शक्यः । भावरूपाणि
विशेषणानि चिन्तितानि। इह तु अभावरूपाणीत्यनुपदोदाहृतब्र-
ह्मगतविशेषाणां विशेषणत्वस्यकण्ठ तएवोक्त्या उपलक्षणत्वायो-
गात्॥आनन्दादिबोधकपदोपसंहारेऽपि तत्तत्पदबोद्ध्यानन्दत्वा-
देः विशेषणत्वानभ्युपगमे उक्तभाष्यविरोधः दुष्परिहरः॥ त-
स्मात् भगवत्पादमते आनन्दत्वविज्ञानधनत्वसर्वगतत्वसर्वा -
त्मत्वादिभावधर्मकं स्थूलत्वाद्याविद्यकधर्मरहितं ब्रह्मैव अपास्त-
समस्तविशेषनिर्विशेषनिर्गुणनिर्धर्मकज्ञेयब्रह्मप्रधानब्रह्मपरब्रह्मे -
तिशब्दैः व्यवह्रीयते - नतु सर्वात्मना गुणत्वावच्छिन्नगुणसामा-
न्याभाववत्-अनुपदोदाहृतभाष्यत्रयविरोधापत्तेः तदेवब्रह्म मनो-

मयत्वभारूपत्वाद्याविद्यकधर्मविशिष्टं सगुणमित्यादिशब्दैः व्यवह्रियत इति सिद्धं श्रीः ॥

स्वापप्रबोधयोः प्रभवप्रलयौ श्रूयेते-यदा सुप्तः स्वप्नं नकश्चन पश्यति-अथास्मिन् प्राण एव एकधा भवति तदेनं वाक् सर्वैर्नामभिरप्येति।स यदा प्रतिबुद्ध्यते एतस्मादात्मनस्सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते इति समाननामरूपत्वाच्चेति सूत्रभाष्यस्य स्वारस्यात्।दर्शनंदृष्टिः,अदर्शनं लयः,इतिदृष्टिसृष्टिपक्षः कथितइति कश्चित्,तन्मन्दम्;अप्येति विप्रतिष्ठन्त इति शब्दाभ्यां प्रलयप्रभवयोरेवाभिधानेन अदर्शनदर्शनयोस्ताभ्याम् अनभिहितत्वात्-यथायतनमिति आयतनस्य गोलकादेः पूर्वसिद्धत्वनिर्देशेन तदंशे लयसृष्ट्यसंभवाच्च-किन्तु विषयेन्द्रिययोः कार्याक्षमत्वतत्क्षमत्वेलक्षणया अप्येति विप्रतिष्ठन्तेशब्दाभ्याम् अभिलिप्येते इत्यता दृष्टिसृष्टिपक्षस्य उक्तभाष्येणासिद्धिः - अन्यथादृष्टिसृष्टिपक्षस्य उक्तभाष्याभिप्रेतत्वेयादिच दर्शनादर्शनेवस्तुनः उत्पादनिरोधौस्याताम्, एवमपि द्रष्टृधर्मौतौ न वस्तुधर्माविति वस्तुनश्शाब्दतत्वप्रसङ्ग इति उत्तरोत् पादे च पूर्वनिरोधादिति सूत्रभाष्यविरोधापत्तिः—श्रीः ॥

ब्रह्मैव स्वाविद्यया संसरति, स्वविद्यया मुच्यते इति बृहदारण्यकभाष्येण अविद्योपाधिविशिष्टं ब्रह्म संसारिशब्दबोधितजीव इति प्रतीयते—अविद्याया एकत्वात् तदुपाधिविशिष्टं ब्रह्म संसारिपदवाच्यम् एकमिति एकजीववादस्सिद्ध्यतीति न शक्यं - तद्गुणसारत्वसूत्रभाष्ये तस्याः बुद्धेः गुणाः इच्छाद्वेषादयः त एव सारः प्रधानमात्मनस्संसारित्व इत्यत्र

जीवोपाधिबुद्धेः एकवचनान्तशब्दनिर्दिष्टत्वेऽपि जात्येकत्वाभिप्रायेण प्रतिजीवं बुद्धिभेदेन नानाजीववादवत् स्वाविद्ययेति एकवचनस्यापि जात्यभिप्रायकत्वेन प्रतिजीवमविद्याभेदेन अविद्योपाधिको जीव इति पक्षेऽपि नानाजीवाभिप्रायकत्वस्य न्याय्यत्वात्—चैत्रमैत्रादीनां सर्वेषाम् अहं ब्रह्म न जानामीति परस्परं ब्रह्माज्ञानभेदस्यानुभवसिद्धत्वात् अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः । ज्ञानेन तु त दज्ञानं येषां नाशितमात्मनः ॥ इति गीतावाक्येनाविद्याभेदावगमाच्च—स्वाविद्येति भाष्यस्थैकवचनस्य जात्याभिप्रायकत्वात् अन्यथा एकजीववादस्वीकारे यावदेकोपाधिगता बन्धानुवृत्तिस्तावदेकजीवव्यवहारः। उपाध्यन्तरे बन्धानुवृत्तौ तु जीवान्तरव्यवहार इत्यनेकजीववादस्य स्पष्टस्य स एव तु कर्मानुस्मृतीति सूत्रीयस्य भाष्यस्य विरोधापत्तिः।तस्मादेकजीववादो भगवत्पादानामत्यन्तानभिप्रेत इति सिद्धम्—श्रीः ॥

ओम् एवं पाञ्चरात्रस्य प्रायेण वेदमूलकत्वस्य तदुक्तनारायणोत्कर्षतदाराधनादेः भगवत्पादाभिमतत्वम् इत्येतत् स्वीकार्यं। श्रुत्यनुसारिणी च स्मृतिः नः प्रमाणमिति स्थितिः। तत् कस्य हेतोरेषपक्षः प्रत्याचिख्यासित इत्यादेः योऽसौ नारायणो देवः परमात्मा परो व्यक्तात् प्रसिद्धः स आत्मानम् अनेकधा व्यूह्यावतिष्ठते इति न तन्निराक्रियते—अस्यार्थस्य स एकधा भवतीत्यादिश्रुतिशतसमधिगतत्वात् । यदपि तस्य भगवतः अभिगमनादिलक्षणम् आराधनमजस्रमनन्यचित्ततयाभिप्रे-

यते—न तन्निषिध्यते अस्यार्थस्य श्रुतिस्मृतिसमधिगतत्वादि-
त्यन्तस्य उत्पत्त्यसंभवादिति सूत्रीयभाष्यस्य प्रामाण्यात्—
श्रीः ॥

ओं ॥ पाशुपतशास्त्रं सर्वात्मना वेदबाह्यमेवेति भगवत्पा-
दाभिप्रायः - सा चेयं वेदबाह्येश्वरकल्पना अनेकविधा इत्युप-
क्रम्य माहेश्वरास्तु कार्यकरणयोगविधिदुःखान्ताः पञ्चपदा-
र्थाः पशुपाशविमोक्षणाय पशुपतिना महेश्वरेण कथिता इत्यन्त-
स्य पत्युरसामञ्जस्यादिति सूत्रभाष्यस्य स्वारस्यात्—श्रीः ॥

ओं—श्रीसालिग्रावाराधनमेव भगवत्पादाभिमतं—न
लिङ्गश्रीचक्रमेर्वाद्याराधनम् । जीवपुर एवास्मिन् ब्रह्मसन्निहि-
तमुपदिश्यते। यथा सालिग्रावे विष्णुस्सन्निहित इति तद्वदिति
दहराधिकरणभाष्यस्य ईश्वरः तत्र हृदयपुण्डरीके निचाय्यो-
द्रष्टव्य उपदिश्यते—यथा सालिग्रावे हरिस्तत्रास्य बुद्धिविज्ञानं
ग्राहकम् । सर्वगतोऽपीश्वरः तत्रोपास्यमानः प्रसीदतीत्यर्भकौ-
कस्त्वसूत्रभाष्यस्य च स्वारस्यात्—लिङ्गश्रीचक्रमेर्वादेः श्रुति-
स्मृतिसूत्राख्य प्रमाणव्याख्यानप्रस्थानत्रयभाष्ये अलेखनात्—
न च विष्णोरुक्तभाष्ययोः ब्रह्म प्रत्युपमानत्वोक्त्या ब्रह्मवि-
ष्णवोः भेदावश्यंभाव इति वाच्यम् । तर्हि उपमेयाच्छतगुणमु-
पमानमित्यालङ्कारिकोक्त्या ब्रह्मापेक्षयापि उपमानभूतविष्णोः
शतगुणाधिक्यापत्तेः । किं तु हृदयपुण्डरीकस्य ब्रह्मोपलब्धि-
स्थानस्य उपमेयस्य उपमानतया सालिग्रावो निर्दिष्टः—अत
एव सालिग्रावे यथाशब्दोत्तरत्वं न तु विष्णौ उक्तभाष्ययो-
र्दृश्यते—न च तर्हि ब्रह्मोपलब्धिस्थानहृदयपुण्डरीकापेक्षया

सालिग्रावस्य शतगुणोत्कर्षः भगवत्पादाभिमतः स्यादिति वाच्यं।
तथैव उक्तभाष्यस्वारस्येन भगवत्पादाभिप्रायस्य वज्रलेपायि-
ततया इष्टत्वात्—अत एव हृदयकमले ब्रह्मोपासनापेक्षया सा-
लिग्रावे भगवदाराधनं मुक्तिसाधनविषये शतगुणमुत्कृष्टमिति
निष्प्रत्यूहम्।एवम् उपनिषद्भाष्यगीताभाष्ययोरपि बहुषु स्थलेषु
सालिग्राव एव ब्रह्मोपलब्धिस्थानहृदयकमलापेक्षया ब्रह्मोप-
लब्धिसाधनप्रणवापेक्षया उपमानतया निर्दिष्टः । न हि कुत्रा-
पि प्रमाणभाष्ये लिङ्गश्रीचक्रादिकं तदुपमानतया निर्दिष्टम् । ए-
तेन सालिग्रावे यथा हरिरित्यत्र यथेश्वर इति, यथा सालिग्रावे
विष्णुरित्यत्र सालिग्रावे ब्रह्मेति कुतो न निर्दिश्यत इति शङ्का
परास्ता—उपमेयकोटिप्रविष्टेश्वरशब्दस्य ब्रह्मशब्दस्य च सामा-
न्यस्य श्रीमन्नारायणे भगवति विष्णौ श्रीहरौ विशेषे पर्यवसा-
नाय भगवदसाधारणहरिविष्णुशब्दयोः उपमानकोटिलेख-
नात्—श्रीः ॥

परमेश्वरशब्दः विष्णोरेवासाधारणः, ईश्वरशब्दस्तु ई-
शनशीलसर्वसाधारणः—अस्मिन्नर्थे अपान्तरतमा नाम वेद्या-
चार्यः पुराणर्षिः विष्णुनियोगात् कलिद्वापरयोस्सन्धौ कृष्णद्वै-
पायनः संबभूवेति स्मरणं वसिष्ठश्च ब्रह्मणो मानसः पुत्रः
निमिशापादपगतपूर्वदेहः पुनः ब्रह्मादेशात् मित्रावरुणाभ्यां सं
बभूवेति भृग्वादीनामपि ब्रह्मण एव मानसानां पुत्राणां वारुणे
यज्ञे पुनरुत्पत्तिः स्मर्यते—सनत्कुमारोऽपि ब्रह्मणः मानसः पुत्रः
स्वयं रुद्राय वरप्रदानात् स्कन्दत्वेन प्रादुर्बभूवेति यावदधिकारा-
धिकरणे उपक्रमभाष्यम्।एवं अपान्तरतमःप्रभृतयोऽपीश्वराः प-

रमेश्वरेण तेषुतेष्वधिकारेषु नियुक्ता इति तदधिकरणोपरितन-
भाष्यश्चसमुच्छित्य प्रमाणम्।अत्र उपक्रमभाष्ये अपान्तरतमोनि-
योजकत्वं विष्णौ उक्तं। हिरण्यगर्भद्वाराऽव्यासवसिष्ठादिनियोजक
पश्चहिरण्यगर्भस्य विष्णुपुत्रत्वात् द्वारत्वं युक्तम्-अपान्तरतम आ-
दिनियोजकस्यैव विष्णोः उपरितनभाष्ये परमेश्वरशब्देन ग्रह-
णं कृत्वा अपान्तरतमः प्रभृतिनियोजकत्वम् उक्तम्—तथा च
ऐक्यसूचकार्थ प्रत्यभिज्ञया मिष्णोरेव परमेश्वरत्वं नान्यस्येति
सिध्यति।अपान्तरमःप्रभृतयोऽपीश्वरा इति अपान्तरतमः प्रभृती-
नाम् ईश्वरत्व निर्देशात् ईश्वरशब्दः ईशनशील सामान्यपर इति
भाष्यकृदभिप्रायः।यत्तु केन चित् उपक्रमे विष्णोः अपान्तरत-
मोनियोजकत्वम् उक्तम् , परमेश्वरस्य तु अपान्तरतमःप्रभृति-
नियोजकत्वमित्यर्थभेदात् न विष्णोः परमेश्वरत्व सिद्धिरिति
जल्पितं । तन्न—अपान्तरतमःप्रभृतीत्यत्र आदिशब्दस्थानीयप्र-
भृतिशब्देन उपक्रमभाष्यनिर्दिष्टापान्तरतमोन्तरनिर्दिष्टवसिष्ठा-
दीनां पुरस्स्फूर्तिकत्वेन उपस्थितानां ग्रहीतव्यतया उभयोः
एकनियोजकत्वपरत्वावसायात् इति—श्रीः ॥

ओं—यज्ञीयपशुहिंसाया अप्यधर्मत्वं भाष्यकृदभिमतं शास्त्रा-
च्च हिंसा अनुग्रहात्मको ज्योतिष्टोमो धर्म इत्यवधारितम् ननु न
हिंस्यात् सर्वा भूतानीति शास्त्रमेव भूतविषयां हिंसामधर्म इत्य-
वगमयति—बाढमिति अशुद्धमिति चेन्न शब्दादिति सूत्रभाष्य
स्वारस्यात् यज्ञीयभूतहिंसायामधर्मत्वं नन्वित्यादिना श्रावयि-
त्वा बाढमिति हिंसायाः अधर्मत्वाङ्गीकारात्—बाढमित्यस्य अ-
ङ्गीकारार्थत्वं सुप्रसिद्धं—तदनन्तरम् उत्सर्गस्तु सः अयश्च अ-

पवादोऽग्नीषोमीयं पशुमालभेतइति उत्सर्गापवादयोश्च व्यवस्थित
विषयत्वमिति तुष्यतु दुर्जन इति न्यायमनुसृत्य लिखितः बा-
ढमिति यज्ञीयहिंसायाः प्रथमम् अधर्मत्वस्वीकारात् ॥

ओं-अतश्चसंक्षेपमिमंशृणुध्वं नारायणस्सर्वमिदं पुराणः।
स सर्गकाले च करोति सर्ग संहारकाले च तदत्ति भूयः इति
पुराण इति स्मृत्यनवकाशसूत्रभाष्यं-तेन भाष्येण सर्वज्ञत्वसर्वश-
क्तियुतं जगदुत्पत्तिस्थितिलयकारणं परं ब्रह्म नारायण एवेति
प्रतिपादनपरं पुराणवचनं धृतमस्ति . नैव प्रस्थानत्रयभाष्ये
शिवादिदेवतान्तरं जगत्कारणं ब्रह्मेत्यर्थपरपुराणवचनं धृतम-
स्ति - तस्मात् भगवत्पादभाष्यसिद्धान्तरीत्या शिवादिदेवतान्त-
रस्य जगत्कारणब्रह्मपरत्वसमर्पकपुराणवचनम् अर्थवाद इति
वा प्रक्षिप्तमितिवा सिध्यतीत्यलम् ।

श्रीः—विधिशिवदुर्गालक्ष्मीसरस्वत्यादिकं भगवतः श्री-
कृष्णस्य विभूतिरित्यर्थे अहमेवाक्षयः कालो धाताहं विश्वतोमुखः,
रुद्राणांशंकरश्चास्मि,कीर्तिश्रीर्वाक्चनारीणां स्मृतिर्मेधाधृतिःक्षमा।
इत्यादिविभूत्यध्यायगतश्लोक तदीयभगवत्पादभाष्याणिदृष्टव्या-
नि-कीर्तिशब्दः लक्ष्मीसरस्वतीवाचकश्रीवाक्छब्दसमभिव्याहा-
रात् नारीणामिति स्त्रीव्यक्तिसमूहात् पृथक्करणरूपनिर्धारणवि-
भक्तिबलाच्च दुर्गाख्यस्त्रीव्यक्तिपरः - प्रधानपुरुषेश्वरइति भगव-
न्नामसहस्रान्तर्गतनामाविवरणे भगवत्पादीयसहस्रनामभाष्ये प्र-
धानं प्रकृतिः माया अविद्या गौरी श्रीरित्यादिपुरुषः जीवः तयो-
रीश्वर इति ग्रन्थेन दुर्गालक्ष्मीसरस्वतीनां भगवन्नियम्यत्वोक्त्या-

पुरुषशब्दितजीवात् पृथक् निर्देशेन च श्रीभगवदपेक्षया न्यूनत्वं जीवकोटयनन्तर्गतत्वश्चावगम्यते - एतेन दुर्गाख्यगौर्याः पुंरूपोल्लासविशेषो विष्णुः तदंशजःइति च शैवागमतदनुसारिपुराणवचनात् सिध्यतीति शाक्तवेदबाह्यप्रलापः परास्तः। उक्तगीताश्लोकतद्भाष्यसहस्रनामभाष्यविरुद्धत्वेन भगवत्पादसिद्धान्तविरुद्धत्वात् - वैष्णवीं लोक इहमादयन्तेति प्रत्यक्षश्रुतौ विष्णुजन्यत्वस्य दुर्गायामुक्तिविरुद्धत्वाच - हरिवंशे श्रीकृष्णावतारप्रकरणे — विष्णोश्शरीरजां निद्रां विष्णोर्निर्देशकारिणीम्-इतिआर्यादेव्याः विष्णुनिद्राशक्तित्वविष्णुकिंकरीत्वोक्तेश्च वेदबाह्यशैवागमतदनुसारिपुराणवचनानां प्रामाण्यस्य वेदभ्रष्टान् प्रत्येव वक्तव्यत्वाच ॥

ओं मन्मना भव मच्चित्तो भवमद्भक्तो भवमद्यजनो भवमांनमस्कुरु-नमस्कारं ममैव कुरु-एवं वर्तमानः वासुदेव एव सर्वसमर्पितसाध्यसाधनप्रयोजनः मामेव एष्यसि आगमिष्यसि-सत्यन्ते तव प्रतिजाने प्रतिज्ञां करोमि भगवतः सत्यप्रतिज्ञत्वं बुध्वा-भगवच्छरणैकपरायणो भवेदितिवाक्यार्थइति अष्टादशाध्यायगतमन्मनाभवेदितिश्लोकभगवत्पादभाष्ये भगवद्भक्तत्वादियुक्तस्य भगवच्छरणैकप्रधानस्य साध्यसमर्पणं साधनसमर्पणं प्रयोजनाख्यफलसमर्पणं वासुदेवे भगवति क्रियमाणमेतद्देहावसाने भगवत्प्राप्तिसाधनमित्युक्तम्। तथाच वासुदेवे भगवतिसाध्यसाधनप्रयोजनसमर्पणं शरणागतिः मोक्षहेतुरिति भगवत्पादाभिप्रायोऽवगम्यते-सर्वधर्मान्परित्यज्येति श्लोकभाष्ये उपक्रमे कर्मयोग-

निष्ठायाः परमरहस्यमीश्वरशरणताम् उपसंहृत्येति भगवच्छरणागतेः परमरहस्यत्वमुक्तमवगम्यते—श्रीः ॥

स्मृत्यनवकाशसूत्रभाष्ये ममान्तरात्मा तव च ये चान्ये देहिसंज्ञकाः। सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केन चित् क्व चित्। विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः। एकश्चरति भूतेषु स्वैरचारी यथासुखम्। इति ग्रन्थेन धृतं मोक्षधर्मीयनारायणीयरुद्रश्रोतृकचतुर्मुखकर्तृकवचनं यत् तेन रुद्रस्य चतुर्मुखवत् देहिसंज्ञकत्वं भगवत्पादाभिमतमिति सिद्ध्यति॥अहं त्वं ये चान्ये ब्राह्मणाः तत्र गन्तव्यमित्युक्तौ - अहंत्वमर्थयोरपि ब्राह्मणत्वसिद्धिवत् ॥ श्रीः ॥

पुरुषसूक्तप्रतिपाद्यस्य परब्रह्मत्वं श्रीकृष्णत्वं च भगवत्पादाभिमतं भूतादिपादव्यपदेशोपपत्तेश्चेति सूत्रभाष्ये अनया ऋचा स्वरसेन ब्रह्मैवावधार्यते-पादोस्य सर्वा भूतानि।त्रिपादस्यामृतं दिवीति सर्वात्मत्वोक्तेः पुंसूक्तेऽपीयमृक् ब्रह्मपरैव समाम्नायते - स्मृतिश्च ब्रह्मणः एवंरूपतांदर्शयति - विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितो जगदितीतिग्रन्थेन पुंसूक्तभगवद्गीताविषयकेण पुंसूक्तोक्तपरब्रह्मणः श्रीकृष्णरूपत्वोक्तेः। ओंश्री ओं मुण्डकभाष्ये अनश्नन्नन्यो अभिचाकशीतीत्यस्यभाष्यम् - अनश्नन्नन्यः इतरः ईश्वरः नित्यशुद्धबुद्धमुक्तस्वभावस्सत्त्वोपाधिकः नाश्नातिप्रेरयिताह्यसावित्यस्ति-तेन च जीवात्मद्वितीयस्य सर्वज्ञस्य ईश्वरस्यसत्वोपाधिकत्वमुक्तम्।प्रेरयितृत्वञ्च भगवद्गीताद्वादशाध्यायप्रथमश्लोकभाष्ये-ज्ञानबलैश्वर्यशक्तिमत्सत्त्वोपाधेः कृष्णस्य तवेति भाष्यं॥ तेन भाष्येण कृष्णस्य सत्वोपाधिकत्वमुक्तं। तथाच

उक्तभाष्याभ्यां सत्वोपाधिकः नित्यशुद्धबुद्धमुक्तस्वभावस्सर्वज्ञ
ईश्वरः श्रीकृष्ण एवेति सिद्ध्यति-सर्वज्ञेश्वरस्य सत्वोपाधिकत्वो-
क्त्या श्रीकृष्णव्यतिरिक्तः सर्वज्ञेश्वरो नास्तीति सिद्धं-रजोगु-
णावच्छिन्नचैतन्यं तमोगुणावच्छिन्नचैतन्यं गुणत्रयावच्छिन्नचैत-
न्यं वा सर्वज्ञेश्वर इति प्रस्थानत्रयभाष्ये कुत्राप्यनुक्ततया न तेषां
सर्वज्ञेश्वरत्वमिति निष्प्रत्यूहं ॥ श्रीः ॥

पद्मपदाचार्यैः भगवत्पादशिष्याग्रेसरैः विरचितभाष्य -
व्याख्यायां पञ्चपादिकायाम् अयं प्राथमिकमङ्गलश्लोकः। नमा-
म्यभोगिपरिवारसंपदं निरस्तभूतिमनुमार्धविग्रहम्। अनुग्रमुन्मृदि-
तकाकलाञ्छनं विना विनायकमपूर्वशंकरमिति भगवत्पादानाम्-
अपूर्वशंकरत्वद्योतकविशेषणैः कैलासवासित्वविशिष्टशंकरस्य च-
यानिभोगिसंपदादिरूपाणिबाह्यचिह्नानितद्राहित्यम् अभोगिपरि-
वारसंपदमित्यादिषड्भिःप्रतिपाद्यते - तत्रनिरस्तभूतिमितिद्वितीयं
विशेषणं तेनाभिक्रमणाधिकरणसिद्धसन्दंशन्यायेन प्रथमतृतीया-
दिविशेषणवत् भूतिशब्दितं भस्मधारणरूपं यत् कैलासवासिशं-
करस्य बाह्यचिह्नं तदभावः कथ्यते-भगवत्पादेषु आन्तरनिरति -
शयज्ञानाणिमाद्यैश्वर्यसत्त्वेन न तन्निरासः निरस्तभूतिमिति विशे-
षणार्थः—तस्मात् ऊर्ध्वपुण्ड्रमेव गोपीचन्दनेन भगवत्पादाना -
मिति सिद्धं ॥

यदीयपदपङ्कजं सुरभिगन्धसंमूर्च्छितं शशाङ्क इव शीतलं-
निजजनैस्सदालोकितम्।मुनीन्द्रहृदि भावितं मुनिजनैस्सदापूजितं
तदीयपदपङ्कजे मम मनस्सदा वर्तताम्।। यच्छब्दार्थो रामः।सच्चि-
दानन्दघनं निर्गुणं शुद्धं ब्रह्म पारमार्थिकसत्ताकं तदन्यत्सर्वंविय-

दादिप्रपञ्चजातं सर्वज्ञत्वादिगुणजातंच व्यावहारिकसत्ताकं पार-
मार्थिकसत्ताशून्यं-पारमार्थिकसत्ताचकालत्रयेप्यविनाशित्वं व्या-
वहारिकसत्ताच स्वरूपेण वा अवस्थारूपेणवा विनाशित्वयोग्यत्वं
शुद्धं ब्रह्मतु मायोपाधिकं सत् सगुणब्रह्मेति शबलब्रह्मेति चोच्यते
तच्च नारायणादिशब्दवाच्यं स्वसमानसत्ताकसर्वज्ञत्वसर्वशक्ति -
त्वादिकल्याणगुणकम् एवं तदेवशुद्धं ब्रह्मान्तःकरणोपाधिकं सत्
जीव इत्युच्यते-शबलब्रह्मोपाधिर्मायासत्वरजस्तमोगुणानां सा-
म्यावस्था आवरणविक्षेपशक्तिमती अनादिः। तस्या एकत्वात्
विभुत्वाच्च तदुपाधिकशबलब्रह्मणोऽप्येक त्वं विभुत्वमनादित्वंच-
जीवोपाध्यन्तःकरणस्य बुध्याख्यस्य बहुत्वात् अणुत्वादनादि-
त्वाच्च तदुपाधिकजीवस्य बहुत्वमणुत्वमनादित्वंच औपाधिकमेव
जीवशबलयोः भेदः शबलगतं सर्वज्ञत्वादिमायोपाध्यधीनमेवशब-
लस्यदिव्यमङ्गलविग्रहोपि भगवतानुग्रहार्थं स्वेच्छयास्वीकृतः सा-
क्षान्मायापरिणामएव नतुभौतिकः जीवस्यबुद्ध्युपाधिप्रयुक्तमेव -
कर्तृत्वभोक्तृत्वविषयसुखित्वदुःखित्वपुण्यपापतदधीनब्राह्मणा -
दिशरीरवत्त्व सदसत्कर्माचरणभगवदाराधन वेदान्तश्रवणमनन-
निदिध्यासन ब्रह्मापरोक्षादिकं सर्वम्।ब्रह्मापरोक्षः शुद्धब्रह्मैक्य-
साक्षात्कारः मोक्षश्च सर्वदुःखशून्यत्वोपलक्षित शुद्धब्रह्मात्मनाव-
स्थितिः। ब्रह्मसाक्षात्कारे सति प्रपञ्चज्ञानप्रपञ्चशब्दाभिलपनरू-
पव्यवहारबाधः तादृशबाधाविष्टत्वमेव प्रपञ्चस्य मिथ्यात्वं नतु
स्वरूपबाधः अन्यथा एकमुक्तिकाले संसारबंधतद्धेतुप्रपञ्चस्य
बाधापत्त्या सर्वेषां मुक्त्यापत्तेः वियदादिप्रपञ्चे मायापरिणामि-
कारणं शबलं ब्रह्म मायाविशिष्टत्वेन रूपेण उपादानकारणं

निमित्तकारणं च शबलेश्वरोपासनापरिपाकेन अर्चिरादिमार्गेण
ब्रह्मलोकप्राप्तिः अवरमोक्षः जीवस्य ज्ञानसुखदुःखेच्छादिकम्
उपाधिभूत बुद्धि धर्म एव। जीवे तु बुध्युपाधिक एव जीवोपा-
धेः मुक्तिदशायां नाशकथनं तु भाष्यविरुद्धमित्येतत्पूर्वमे-
वोक्तम् – शुद्धब्रह्मणो निर्गुणत्वं च आविद्यकधर्मशून्यत्व -
मेव। आनन्दादिगुणस्य शुद्धेऽपि सत्वमस्तीति पूर्वमेवोक्तम्
इत्यद्वैतभाष्यकाराशय सङ्ग्रहः – द्रव्याद्रव्यप्रभेदान्मितमुभय -
विधन्तद्विदस्तत्त्वमाहुः द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्य-
मव्यक्तकालौ–अन्त्यंप्रत्यक्पराक्च प्रथममुभयधा तत्र जीवे-
शभेदान्नित्याभूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहुः–
इति वेदान्ताचार्यकृतविशिष्टाद्वैतसङ्ग्रहः—स्वातन्त्र्यात्तद्विरुद्धा-
न्मितमुभयविधं तद्विदस्तत्त्वमाहुः स्वातन्त्र्यं नास्त्यविष्णोर्यत
इदमखिलं चिज्जडं विष्णुतन्त्रम्–स्वातन्त्र्याधारभूतो हरिरवग
मितस्त्वेक एवाग्र आसीदित्यादेश्शास्त्रसङ्घात् पर इह भगवान्
एक एवाद्वितीय इति द्वैतमतसङ्ग्रहः–स गुणब्रह्मणश्शबलस्य वि-
ष्णुत्वमित्येवंरूपप्रधानांशे द्वैत्यद्वैतिविशिष्टाद्वैतिमतत्रयं समान-
मेव। स गुणब्रह्मजीवयोः निरतिशयज्ञानानन्दादिगुणवत्त्व त-
द्विरुद्धगुणवत्त्व रूपप्रधानांशे मतत्रयं समानमेव। भेदस्य औपा-
धिकत्व स्वाभाविकत्व वैलक्षण्येऽपि सगुणब्रह्मजीवभेदत्वेन रू-
पेण मुख्यभेदांशे मतत्रयं समानमेव। मुक्तिदशायामपि यस्मा-
त्सगुणब्रह्मणः मुक्तस्य भेदः द्वैतिविशिष्टाद्वैतिभ्यां स्वीकृतः।तस्मा-
त्सगुणब्रह्मणः अद्वैतिभिरपि मुक्ते भेदस्य स्वीकृतत्वात्–मुक्तस्य
निर्गुणब्रह्मैक्यमेव अद्वैतिभिः स्वीकृतं नतु सगुणब्रह्मैक्यं मुक्तौ

आनन्दानुभवः प्रमातृस्वरूपमुक्तात्मकएवेति द्वैतिमतम्।अद्वैतिम-
तेऽपि आनन्दानुभवः मुक्तस्वरूपएव-विशिष्टाद्वैतिमतेतु मुक्तस्व-
रूपाद्भिन्नः धर्मभूतज्ञानप्रसारविशेषइतिवैलक्षण्येऽपि मुक्तावान-
न्दानुभवे प्रधानांशे मतत्रयेऽपि साम्यमेव-अद्वैतिमते ब्रह्मणि पा-
रमार्थिकसत्ता तद्भिन्नप्रपञ्चे व्यावहारिकसत्तेतिद्वैविध्यं-विशिष्टा-
द्वैतिमते ब्रह्मणि निरुपाधिकसत्ता तद्भिन्नप्रपञ्चे सोपाधिकसत्ते
ति सत्ताद्वैविध्यं। द्वैतिमते स्वरूपप्रवृत्तिप्रमितिरूपसत्तात्रये परा-
नपेक्षत्वं स्वतन्त्रत्वं स्वरूपप्रवृत्तिप्रमितिरूपसत्तात्रये परापे-
क्षत्वम् अस्वतन्त्रत्वम् इति मध्वाचार्यकृततत्त्वविवेकतत्त्वसङ्ख्यान-
रूपग्रन्थरीत्या ब्रह्मणः परानपेक्षसत्ता तद्भिन्नप्रपञ्चस्य परा-
पेक्षसत्तेति सत्ताद्वैविध्यमस्ति। एवं ब्रह्मसत्ताप्रपञ्चसत्तयोः
किञ्चित्किञ्चित् वैलक्षण्ये सत्यपि ब्रह्मसत्तापेक्षया न्यूना
प्रपञ्चसत्ता प्रपञ्चसत्तापेक्षया उत्कृष्टा ब्रह्मसत्ता इत्येवं री-
त्या सत्तास्वीकाररूपप्रधानांशे मतत्रयं सममेव - ब्रह्मभिन्न-
प्रपञ्चस्य स्वरूपेण वा अवस्थारूपेण वा विनाशयोग्यत्वं
मतत्रयेऽपि समानमेव - मुक्तिदशायां संसारहेतुप्राकृतप्रपञ्च -
ज्ञानतदभिलपनरूपव्यवहारबाधाः तदाक्रान्तत्वं च प्रप -
ञ्चस्येति एतत् मतत्रयेऽपि समानमेव-तस्मात् प्रधानांशे म-
तत्रयस्यापि साम्यात् उपसर्जनांशेषु वैलक्षण्येऽपि मतत्रयं
निर्मत्सराणाम् उपादेयमेव - अत एव अप्पय्यदीक्षितैरपि न्या-
यमुक्तावल्याख्यग्रन्थे–आनन्दतीर्थमुनिलक्ष्मणदेशिकेन्द्र श्री -
कण्ठयोगिपदवीरदवीयसीर्नः-आचार्यपादसरणिश्चविविच्य बो -
द्धुं संगृह्यते मतचतुष्टयसारलेशइति श्लोकेन द्वैताद्वैतविशिष्टाद्वैत-

मतानामुपादेयत्वमुक्तं सङ्गच्छते—अन्यथा उपसर्जनांशवैलक्षण्येन प्रधानांशावैलक्षिण्येऽपि स्वस्वमतं स्वस्य स्वस्य अनुपादेयमेव स्यात् अद्वैतिमतप्रविष्टवाचस्पतिविवरणपक्षयोः अवच्छिन्नवादप्रतिबिम्बवादतत्तज्जीववादप्रपञ्चभेदप्रपञ्चैक्यवैलक्षण्यं दृश्यते । विशिष्टाद्वैतमतप्रविष्टतेंगलवडकलयोः श्रीविभुत्वादिविषयेषु बहुषु वैलक्षण्यं दृश्यते—मध्वमतप्रविष्ट उत्तरादिमठ व्यासरायमठप्रविष्टयोः वाजिराजस्वामिनः वाय्वंशत्वविषये रक्तमृत्तिकाधारणविषये श्रवणद्वादशीव्रतानुष्ठानविषये जयन्तीपारणविषये च वैलक्षण्यं दृश्यते – एवंरूपवैलक्षण्येऽपि प्रधानांशसाम्यात् उपादेयत्वे तत्तन्मतस्य द्वैताद्वैतविशिष्टाद्वैत मतत्रयेऽपि उपादेयत्वं निर्मत्सराणामिति सुधियो विदां कुर्वन्तु॥

ओं—इदं तु बोध्यं दहराधिकरणे उत्तराच्चेदाविर्भूतस्वरूपस्त्विति सूत्रभाष्ये यत्विदं परमेश्वरवाक्ये जीवमाशङ्क्य प्रतिषेधति सूत्रकारः नासम्भवादित्यादिना। तत्रायमभिप्रायः आत्मैकत्वप्रतिपादनपरवाक्यैः न्यायोपेतैः द्वैतवादप्रतिषेधैश्च परमात्मनो जीवादन्यत्वं द्रढयति।जीवस्यतुनपरस्मादन्यत्वं प्रतिपिपादयिषति किन्त्वनुवदत्येवाविद्याकल्पितं लोकप्रसिद्धं जीवभेदं एवं हि स्वाभाविककर्तृत्वभोक्तृत्वानुवादेनप्रवृत्ताः कर्मविधयोन विरुध्यन्त इतीति भाष्यं तत्र ब्रह्मणि जीवादन्यत्वं द्रढयतीत्यनेन जीवप्रतियोगिकभेदः ब्रह्मणि दृढ इत्युक्तं। दार्ढ्यं च भेदस्य शैथिल्ययोग्यत्वाभावः।दृढं बध्नातीत्यादौ तथादर्शनात् लोकप्रसिद्धेश्च। तथा च भेदशास्त्रं जीवप्रतियोगिकभेदाभिप्रायकम्।

अभेदशास्त्रं भेदनिषेधकशास्त्रं च ब्रह्मप्रतियोगिकजीवानुयोगिकभेदाभावाभिप्रायिकं जीवस्य तु न परस्मादन्यत्वं प्रतिपिपादयिषतीत्यादिना प्रकृतग्रन्थस्थेन तथाभिधानात् । न च मुक्तिदशायां जीवत्वं नश्यतीति शङ्क्यं। तद्दशायां जीवत्वस्यैवाभावे जीवत्वविशिष्टप्रतियोगिकभेदस्य शैथिल्यापत्त्या जीवभेदस्य ब्रह्मणि दार्ढ्योक्तिरसंगता स्यात् दार्ढ्यं चोक्तं परमात्मनो जीवादन्यत्वं द्रढयतीति जीवत्वस्य कल्पितत्वन्तु मुक्तौ अभासमानत्वमेव।न तु स्वरूपनाशः उक्तानुपपत्तेरेव।अत एव उदाहृतभाष्ये स्वाभाविककर्तृत्वभोक्तृत्वानुवादेन प्रवृत्ताः कर्मविधयो न विरुध्यन्त इत्युक्तं कर्तृत्वादीनामपि स्वाभाविकत्वम्—श्रीः ॥

तामष्टादशधा दृष्ट्वा शङ्करस्सूतसंहिताम्। चक्रे शारीरकं भाष्यं सर्वश्रुतिमनोहरमिति अभियुक्तोक्तौ भाष्यं सर्वश्रुतिमनोहरमित्यनुक्त्वा भाष्यस्य शारीरकम् इति विशेषणदानात् शारीरकभाष्यस्यैव सर्वश्रुतिमनोहरत्वम् उपनिषद्भाष्यगीताभाष्ययोस्तु न तथेत्यवगम्यते-सूतसंहितां दृष्ट्वा कृतस्य भाष्यस्य सूतसंहिता मनोहरमिति विशेषणस्य वक्तव्यत्वेन श्रुतिमनोहरमित्युक्त्या श्रुत्याभिप्रायरीत्यैव भाष्यं कृतम्।नतुसूतसंहिताभिप्रायेणेतिगम्यते-सूतसंहितादर्शनंतु सूतसंहितार्थनिरासार्थं बहुधा परमतंदृष्ट्वा शास्त्रमनोहरं स्वमतं रचयतीत्यादौ निरासार्थं परमतस्य दर्शनवत् किञ्च सूतसंहितापदस्य सूतकृता संहितेति व्युत्पत्तिः कार्या। न तु सूतप्रोक्ता संहितेति। तथा सति अष्टादशपुराणानामपि सूतप्रो-

क्तत्वात् भागवतादीनामपि सूतसंहितात्वापत्तेः। नापि सूतस्य प्रतिपादिका।संहिता सूतसंहिता शंकरसंहितेतिवत् इति शङ्क्यं,सूतस्य तद्ग्रन्थे शंकरसंहितायां शंकरस्यैव अप्रतिपादनात् सूतकृतैव संहितेति सिद्धम् । अत एव संकरजातिकृतत्वात् सूतसंहितायाः भगवत्पादभाष्ये कुत्रापि न लेखनं, यथा ज्ञानवासिष्ठस्य काश्मीरस्थ वसिष्ठभट्टकृतस्य भगवत्पादैरनुदाहृतत्वं तद्वदित्यलम्॥

अनुभाष्यगाम्भीर्यं समाप्तम् ॥

———

अश्वत्थशब्दपूर्वक नारायणनामकस्य सर्वेषु ।
तन्त्रेषु स्वातन्त्र्यं श्रीपतिविष्णोः कलादिसंयोगात् ॥
तत्सुतपुत्रो विद्वान् शास्त्री श्रीरामसुब्बिति ख्यातः ।
तेनेदं रचितं तच्छांकरभाष्यार्थगुम्भनं यत्र ॥

सर्वतन्त्रस्वतन्त्रभगवत्कलांश श्रीमदश्वत्थनारायणशास्त्रिणां पौत्रेण
रामसुब्बशास्त्रिणा विरचितमनुभाष्यगांभीर्यं
समाप्तम्.
श्रीः.

सामोर्प्पद्दूर्ग्रामख्यातः काञ्च्याः पश्चाद्देशे रम्ये। तत्ग्रामस्थावपिप्रावत्सास्त्वौदीच्याख्यास्तेषांमद्ध्ये।।रघुनाथाख्यभूदेवस्त्वासीच्छास्त्रार्थतत्त्ववित्। पुत्रस्तस्य चतुस्तन्त्री रामभद्राख्यपण्डितः ॥ तस्य पुत्रद्वयं ख्यातं तत्रैकोय्याख्यभूसुरः। सतुविद्वान् सर्वशास्त्रेतुळजीन्द्रपुरेवसत् ॥ तस्यपुत्रत्रयंजातं मद्ध्यमोण्णाख्य पण्डितः । यस्यशिष्यप्रशिष्यैस्तु भूषितंमण्डलम्भुवः॥ तस्यपुत्रो हरेरंश साक्षान्नारायणाह्वयः । अश्वत्थपूर्वपदकः प्रसिद्धः पृथिवीतले ॥ पितुस्सकाशात्संलब्धसर्वशास्त्रार्थतत्त्ववित् । स्वपितुर्निकटे शास्त्रमद्वैतं ज्ञातुमागतात् ॥ अहोबिलाख्यविदुषो महाभाष्यंगृहीतवान् । स्वयंप्रकाशप्रमुखा यतिवर्याअपिस्वयम्। यस्मादधीतवेदान्तत्रितया ख्यातपण्डिताः॥माध्वारामानुजीयाश्च श्रीशांकरमतानुगाः । स्वस्वसिद्धान्तसंसिद्ध ग्रन्थतत्त्वबुभुत्सया ॥ यस्यच्छात्रत्वमापद्य पाण्डित्येप्रथिताभवन् । पातञ्जलेमहाभाष्ये गादाधर्यांचवार्तिके॥ भट्टपादकृतेभाष्ये शबरस्वामिनाकृते। खण्डदेवकृतौ भाट्टदीपिकायांचकौस्तुभे ॥ ब्रह्मानन्दसरस्वत्यारचिताचन्द्रिकाभिधा । कृतिस्तस्यान्दोड्डयार्यरचितेचण्डमारुते ॥ तत्तन्मतस्थभाष्येषु तथा विद्यान्तरेषु च—ज्ञानं यस्य महान्तोपि शास्त्रिणस्त्रयंबकादयः ॥ ज्ञात्वाश्चर्यमुदंचैव प्रापुइतिहिशुश्रुम: । सीतापतेःपादपद्मे यन्मनोलिस्सदास्थितः ॥ इतिश्रुतंमयातस्य पुत्रः श्रीरामशंकरः । धर्मशास्त्रेतथापूर्वतन्त्रेबुद्धिमवापसः । तस्यपुत्रत्रयंतत्र ज्येष्ठोनारायणाह्वयः ॥ श्रुति-

स्मृतितदर्थेषु सम्यक्छ्रद्धासमन्वितः। कोदण्डपूर्वकैर्वर्णैः नाम्ना-
रामेतिविश्रुतः। कनिष्ठोमध्यमस्तत्र रामसुब्बिति विश्रुतः॥ शि-
वरामार्यसंज्ञानां देशिकानांमहात्मनां। प्रसादात्सर्वशास्त्रज्ञो राम-
दास्यरसानुभूः॥ तेनायंरचितोग्रन्थो लोकानुग्रहकाम्यया॥श्री-
रस्तु — श्रीमद्भगवत्कलावतार श्रीमदश्वत्थनारायणशास्त्रिणां
पौत्रेण श्रीरामसुब्रह्मण्यशास्त्रिणा विरचितं अनुभाष्यगांभीर्यं
समाप्तं॥ हरिः ओं॥

इदन्तु बोद्धव्यम्॥ स आत्मा तत्त्वमसीत्यत्र तत्पदं स
गुणब्रह्मपरं–त्वंपदं–शारीरत्वविशिष्टपरम्। वाक्यन्तु शारीर-
त्वविशिष्टस्य स गुणब्रह्माभेदपरम्। न तु शुद्धस्वरूपाभेदप-
रम्। अभेदज्ञानफलश्च शारीरस्य भोक्तृत्वनिवृत्तिरित्यत्र शा-
स्त्रञ्च तत्त्वमसीत्यपहतपाप्मत्वादि विशेषणम्॥ ब्रह्मशारीरस्या-
त्मत्वेनोपदिशत् शारीरस्यैव तावत् उपभोक्तृत्वं वारयतीति
संभोगप्राप्तिसूत्रभाष्यं प्रमाणम्। नहीश्वरस्य संसार्यात्मत्वं प्रति-
पाद्यते इत्यभ्युपगच्छामः। किन्तर्हि संसारिणः संसारित्वापोहे-
नेश्वरात्मत्वं प्रतिपादियिषितमिति। एवं च सति अद्वैतेश्वरस्या-
पहतपाप्मत्वादिगुणता। विपरीतगुणतातु ईश्वरस्य मिथ्येति
व्यवतिष्ठत इति आत्मेति तूपच्छन्तीति सूत्रभाष्यञ्च उक्तार्थमेव
–द्रढयति–ईश्वरीयापहतपाप्मत्वादिगुणतायाः तद्विपरीतगुणत्व-
मात्रमिथ्यात्वोक्त्या सत्यत्वदृढीकारात् ईश्वरमिथ्यात्वतद्गुणापह-
तपाप्मत्वादिगुणमिथ्यात्ववादी नव्यः परास्तः॥ शारीरस्योप-
भोक्तृत्वरूप सुखदुःखभोक्तृत्वात्मकसंसारित्वापोहोक्त्या शारी-

रस्यैवेत्येवकारेण च शारीरत्वं शरीरतादात्म्यभ्रमराहित्यरूपा-
शरीरत्वं गतस्यापि अस्तीति सिद्ध्यति॥ एतेन निर्विशेषब्रह्मता-
दात्म्यमेव जीवस्वरूपस्य तत्त्वमसिवाक्यार्थ इति वादः परा-
स्तः, उक्तभाष्यद्वयविरुद्धत्वात्॥ ननु शारीरत्वस्य तत्त्वमसि-
वाक्यार्थज्ञानानिवर्त्यत्वे ईश्वरशारीरयोः मुक्तिकाले भेदावश्य-
कतया तत्त्वमसीति जीवेश्वरयोरभेदोक्तिर्विरुद्धेति चेन्न–भेदस्य
शारीरप्रतियोगिकत्वेनाभेदस्येश्वरप्रतियोगिकत्वेन भेदाभेदयो-
रेकप्रतियोगिकत्वाभावेनाविरोधात्। तदुक्तं दहराधिकरणे'उत्तरा-
च्चेदाविर्भूतस्वरूपस्तु'इतिसूत्रभाष्ये यत्त्विदं परमेश्वरवाक्ये जीव-
माशङ्क्यप्रतिषेधति सूत्रकारः नासम्भवादित्यादिना,तत्रायमभि-
प्रायः-नित्यशुद्धमुक्तसत्यस्वभावे कूटस्थनित्ये एकस्मिन्नसङ्गे अरू-
पे परमात्मनि तद्विपरीतं जैवं रूपं व्योमनि तलमलिनतादिवत् प-
रिकल्पितं तदात्मैकत्वप्रतिपादनपरैः न्यायोपेतैः द्वैतवादप्रतिषेधै-
श्चापनेष्यामीति परमात्मनो जीवादन्यत्वं द्रढयति॥ जीवस्य तु
नपरस्मादन्यत्वं प्रतिपिपादयिषति, किन्तु अविद्याकल्पितं लोक-
प्रसिद्धमिति। किञ्च-एतद्भाष्ये जैवं रूपं व्योमनीवत लमलिन-
तादिपरिकल्पितमित्यत्र जैवरूपं नजीवत्वं, किन्तु कर्त्र-
भोक्त्रगेद्वेषादिरूपमेव। एतद्भाष्याव्यवहितपूर्वस्मिन् त-
स्मादविद्याप्रत्युपस्थापितापारमार्थिकं जैवं रूपं कर्तृभोक्तृरा-
गद्वेषादिदोषकलुषितमनेकानर्थयोगितद्विलयनेन तद्विपरीतम-
पहतपाप्मत्वादिगुणकं पारमेश्वरं रूपं विद्यया प्रतिपद्यतइति
भाष्ये कर्तृभोक्त्रादिरूपस्यैव जैवस्य कल्पितत्वविनाशित्वयोः
प्रतिपादनात्। जीवत्वस्य कल्पितत्वविनाशित्वयोः अप्रतिपा-

दनाच्च ब्रह्मणि जीवान्यत्वदार्ढ्योक्तिः जीवोपाधिबुद्धेः नित्यत्वं सूचयति ॥ श्रीः ॥

मनुष्योहं ब्राह्मणोहं काणोहमिति शरीरेन्द्रियसंघाते अहंशब्दितात्मतादात्म्य बुद्धिरध्यासः। अहमर्थात्मा त्वं पदार्थः,तत्पदार्थोऽपि आत्मैव। तथाच तत्त्वमसि वाक्यम् आत्मनि आत्मतादात्म्यबोधकं,नतु जीवे ईश्वरस्य वा निर्विशेषचितोवा तादात्म्यबोधकमित्यत्र अपवादोनाम यत्रैकस्मिन्वस्तुनि पूर्वनिविष्टायां मिथ्याबुद्धौ निश्चितायां पश्चादुपजायमाना यथार्था बुद्धिः पूर्वनिविष्टायाः मिथ्याबुद्धेः निवर्तिकाभवति-यथा देहेन्द्रियसंघाते आत्मबुद्धिः आत्मन्येव आत्मबुद्ध्या निवर्तते । पश्चाद्भाविन्या तत्त्वमसीत्यनया यथार्थबुद्ध्या निवर्ततइति 'व्याप्तेश्च समञ्जस' मितिसूत्रभाष्यं प्रमाणं ॥ श्रीः ॥

तत्पदं सर्वज्ञब्रह्मपरं-तस्य ब्रह्मणः पूर्वप्रकृतत्वात् - तस्य असधात्वर्थसत्तायामन्वयः।तस्याख्यातार्थाश्रयत्वे।तस्य प्रथमान्तत्वंपदार्थे। तथाच ब्रह्मवृत्तिसत्ताश्रयत्ववान् त्वमिति वाक्यार्थावगतेः तत्त्वमसीति सामानाधिकरण्यावगतब्रह्मजीवाभेदः जीवब्रह्मोभयानुगतैकसत्ताकत्वमिति भाष्यकाराभिप्रायः-यथा-कारणं ब्रह्म त्रिषुकालेषु सत्त्वं नव्यभिचरति एवं कार्यं जगत् त्रिषुकालेषु सत्त्वं नव्यभिचरति।एकश्च पुनस्सत्त्वं अतोप्यनन्यत्वं कारणात् कार्यस्येति'सत्त्वाच्चापरस्ये'ति सूत्रभाष्यस्वारस्यात् कार्यकारणानन्यत्वे अतश्शब्देन एकसत्ताकत्वस्य हेतुत्वनिर्देशात्

तत्त्वमसीत्यत्र शब्दस्वरसरीत्या जीवब्रह्मानुगतैकसत्त्वैव ऐक्यमितिसिद्धम् ॥ श्रीः ॥

तत्त्वमसीति सामानाधिकरण्यावसेयाभेदः जीवे ब्रह्माविभागएव। अविभक्तएव परेणात्मना मुक्तोवतिष्ठते।कुतः? दृष्टत्वात् तथाहि तत्त्वमस्यहं ब्रह्मास्मियत्र नान्यत् पश्यति नतुतद्द्वितीयमस्तिततोन्यत् विभक्तं यत् पश्येत् इत्येवमादीनिवाक्यानि अविभागेनैव परमात्मानंदर्शयन्ति।यथादर्शनमेव फलं युक्तं, तत्क्रतुन्यायात्। यथोदकं शुद्धेशुद्धमासिक्तं तादृगेवभवति एवं मुनेर्विजानत आत्माभवति गौतमेति एवमादीनि मुक्तस्वरूपनिरूपणपराणि वाक्यानि अविभागमेव दर्शयन्तीत्याद्यविभागोवचनादिति सूत्रभाष्यप्रामाण्यात् , नह्यत्र अविभागशब्दः अभेदपरः। तर्हि भवद्रीत्याविभागशब्दस्य भेदपरत्वस्य वक्तव्यतया एतद्भाष्यगृहीतं नतु तद्द्वितीयमस्ति ततोत्यत् पश्येत् यद्विभक्तमितिविभक्तत्वान्यत्वयोः पृथगुपादानं नस्यात् , एकस्मिन्वाक्येघटककलशवत् पर्यायत्वात् – तस्मात् विभागोविश्लेषएव तदभावोऽविभागइति सिद्ध्यातत्त्वमसीति संश्लेषविशेषएवबोध्यते । नतु स्वरूपैक्यम्।एवंब्रह्मणि द्वितीयनिषेधश्रुतिवाक्यं विश्लेषमेवप्रपञ्चस्य निषेधतीति उक्तभाष्यादेव सिद्ध्यति।एवं जीवेशयोः परस्परभेदाविरुद्धाः तत्त्वमस्यर्थाः सूत्रभाष्यस्थाः सन्तीत्यलं श्रीः॥

छान्दोग्यभगवत्पादभाष्ये - ऐतदात्म्यमेतत् सदात्मा यस्य सर्वस्यतदेतदात्मा। तस्यभावः ऐतदात्म्यम्।एतेनसदाख्येनात्मना आत्मवत् सर्वमिदंजगत् तदेवसदाख्यं कारणं सत्यंपर-

मार्थसत्-अतस्स एवात्मा जगतः प्रत्यग्रूपम् आत्मशब्दस्य निरुपपदस्य प्रत्यगात्मनि गवादिशब्दवत् निरूढत्वात् अतः तत् सत् त्वम् असिभवसि श्वेतकेतो इत्यादि ग्रन्थः तेन च कारणत्वविशिष्टस्य कारणस्य परमार्थसत्यत्वमुक्तं । कारणस्य ब्रह्मणो मिथ्यात्वे तदसंगतंस्यात् । सत् पदार्थवृत्तिभवनाश्रयस्त्वमिति तत्त्वमस्यर्थश्चोक्तः । सचोभयानुगतैकसत्त्वेति भाष्याभिप्रायः ॥ श्रीः ॥

स्वाभावकी ज्ञानबलक्रियाचेति श्रुतौ ज्ञानबलान्यां सहिताक्रियेतिविग्रहः । बलमत्रशक्तिः क्रिया सामर्थ्यविशेषः तेषां मद्ध्ये आदिभूतस्य स्वाभाविकीतिपदोक्तं स्वाभाविकत्वं यावद्यत्त्यवतिष्ठमानत्वाख्यस्वाश्रयनिष्ठात्यन्ताभावाप्रतियोगित्वल - क्षणस्वाश्रयसातत्यरूपमित्यङ्गीकर्तव्यं भगवत्पादमतानुसारिभिः। ईक्ष्यधिकरणे यस्य हि सर्वविषयावभासनक्षमं ज्ञानं नित्यमस्ति सोसर्वज्ञइति विप्रतिषिद्धम् अनित्यत्वे हि ज्ञानस्य कदाचित् जानाति कदाचित् नजानातीति असर्वज्ञत्वमपि स्यात् । नासौज्ञाननित्यत्वे दोषोस्तीतिभाष्यमुक्तार्थे प्रमाणमवगन्तव्यं नह्यत्रभाष्ये ज्ञानं विषयावभासनक्षमं स्वरूपज्ञानं यस्य हीति षष्ठ्या स्वरूपसंबन्धित्वोक्तेः ॥

धर्मभूतज्ञानमेव तस्य च नित्यत्वं सोपपत्तिकमुपपादितम्। एतेन बलक्रिययोरपि स्वाभाविकत्वमुपपादितप्रायं ॥ श्रीः ॥

अन्तस्तद्धर्माधिकरणे यत्र निरस्तसर्वविशेषं पारमेश्वरं रूपमुपदिश्यते, भवति तत्र शास्त्रमशब्दस्पर्शमरूपमव्ययमित्या-

दीतिभाष्यं तत्र पारमेश्वरस्य शुद्धस्य निरस्तसर्वविशेषमिति निर्विशेषत्वमुक्तं ॥

दहराधिकरणे उत्तराच्चेदाविर्भूतस्वरूप इतिसूत्रे अपहतपाप्मत्वादिगुणकं पारमेश्वरं रूपं विद्ययाप्रतिपद्यतइतिभाष्यं तत्र पारमेश्वरशब्देन अन्तस्तद्धर्माधिकरणपारमेश्वरशब्दनिर्दिष्टशुद्धं ब्रह्मानूद्य अपहतपाप्मत्वादिगुणकमिति विशेषणेन अपहतपाप्मत्वादिसत्यसंकल्पत्वान्तप्रजापतिवाक्योक्तगुणकत्वमुक्तं । तथाचोभयोर्भाष्ययोरविरोधाय अपहतपाप्मत्वादिगुणाति - रिक्ताविद्यकगुणनिषेधपरमेव निरस्तसर्वविशेषमिति अन्तस्तद्धर्माधिकरणीयपदंनेयं, नतु सर्वधर्मनिषेधपरम्, उदाहृतभाष्यविरोधापत्तेः । अद्वैतेश्वरस्यापहतपाप्मत्वादिगुणता, विपरीतगुणतातु ईश्वरस्यमिथ्येति आत्मेतितूपगच्छन्तीति सूत्रभाष्ये अपहतपाप्मत्वादिगुणानाम् ईश्वरीयाणां तद्विपरीतगुणमिथ्यात्वोक्तिद्वारा दृढीकृतसत्यत्वानां विरोधापत्तेश्च ॥ श्रीः ॥

कार्यं बादरिरित्यधिकरणे - किं द्वे ब्रह्मणी-बाढं द्वे परमपरश्चेति श्रुतिप्रामाण्यात् यत्र अस्थूलादिवाक्यैः आविद्यकधर्मनिषेधेनोपदिश्यते तत् परमितिभाष्येण आविद्यकधर्माणामेव शास्त्रे ब्रह्मणि प्रतिषेधइत्यवगम्यते - नतु आनन्दादिकल्याणगुणानाम् आनन्दादयःप्रधानस्येतिसूत्रोक्तानां नवाक्षरधियामितिसूत्रोक्तानाम् अस्थूलत्वादि हेयगुणाभावानां तेषामपिगुणानां ब्रह्मणि निषेधस्वीकारे तत्रतु भावरूपाणि विशेषणानि चिन्तितानि अत्रतु - अभावरूपाणि विशेषणानीति अक्षरधियामिति

सूत्रभाष्यविरोधापत्तेः । तत्र आनन्दादयः प्रधानस्येत्यत्र अत्र अक्षरधियामितिसूत्रे इतिटीका ॥

नच आनन्दादिगुणानाम् अस्थूलत्वादिगुणानाञ्च उपलक्षणतया स्वीकारइतिशङ्क्यं भाष्ये भावरूपाणि विशेषणानि अभावरूपाणि विशेषणानीति कंण्ठतएव तेषां विशेषणत्वोक्तेः तस्मात् शुद्धं ब्रह्मापि अनाविद्यकस्वाभाविकापहतपाप्मत्वादि आनन्दादि अस्थूलत्वाद्यनेकगुणयुक्तमेव - निषेधशास्त्रमाविद्यकगुण निषेधपरं- ज्ञानबलक्रियाः ब्रह्मणि शुद्धे स्वाभाविक्य इति निष्प्रत्यूहं भगवत्पादमते शुद्धं ब्रह्मस्वस्मिन् अतिशयाधायकधर्मरहितं केनापि स्वस्मिन अतिशयाधानासंभवात् निर्गुणशब्दोपि ब्रह्मण्यतिशयाधायकधर्मशून्यपरः, नतु धर्मसामान्यशून्यपर इत्यस्मिन्नर्थे - एकोदेवस्सर्वभूतेषु गूढस्सर्वव्यापी सर्वभूतान्तरात्मा कर्माद्ध्यक्षस्सर्वभूताधिवासस्साक्षीचेता केवलोनिर्गुणश्चेति सपर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धमितिचतौमन्त्रौ अनाधेयातिशयतां नित्यशद्धताञ्च ब्रह्मणोदर्शयतइति समन्वयसूत्रभगवत्पादभाष्यं प्रमाणम् । अनाधेयातिशयतामितिपदेन अनाधेयः अनुत्पाद्यः अतिशयोयस्यसः अनाधेयातिशयस्तस्यभावः अनाधेयातिशयतेत्यर्थकथनेन अतिशयाधायकधर्मशून्यत्वस्य ब्रह्मण्यवबोधनात् - प्रथममन्त्रः अतिशयाधायकधर्मशून्य आत्मा इत्यर्थकः,द्वितीयः नित्यशद्धत्वाभिप्रायकइति भाष्यकाराभिप्रायः । श्वेताश्वतरभाष्ये एकोदेवइति मन्त्रघटकनिर्गुणशब्दः सत्त्वादिगुणत्रयरहित इत्यर्थकतया व्या-

ख्यातः । पञ्चपादिकायां पद्मपदाचार्यैः आनन्दोविषयानुभवो नित्यत्वंचेतिसन्तिधर्माः अपृथक्त्वेपिचैतन्यात् पृथगिवावभासन्तइत्युक्तम् आनन्दादिधर्माणां ब्रह्मणि सत्त्वमस्ति-तेषां ब्रह्मपृथक्त्वं नास्ति पृथक्त्वन्तुमिथ्याभूतमित्यस्यार्थः प्रतीयते पृथगिवेति इवशब्दस्य पृथक्त्वोपरिनिवेशात् - धर्माणाम् आनन्दादीनां ब्रह्मण्यसत्त्वे धर्मास्सन्तीति सत्त्वनिर्देशो धर्माणामयुक्तस्स्यात् तदानीं हि सन्तीवधर्माः सन्तिधर्मा इवेति इवकारघटनंस्यात् - धर्मिधर्मभावोपि नकाल्पनिकः। किन्तु पारमार्थिकएवसन्तिपदोत्तरं धर्मपदोत्तरञ्च इवकारानिर्देशात् - धर्मास्सन्तीतिधर्माणाम् अस्तित्वोक्तेश्च-भामत्यामपि - आनन्दविज्ञानादयो ब्रह्मधर्माः ब्रह्मतत्त्वस्वरूपाः,नतु काल्पनिकाः तस्मादानन्दविज्ञानादयो ब्रह्मतत्त्वात्मकतयोक्ताः यत्रयत्र ब्रह्मश्रूयते तत्रतत्रानुक्ता अपिलभ्यन्तइति आनन्दादयः प्रधानस्येति सूत्रभामतिग्रन्थः ॥श्री॥

इदन्तुतत्त्वं प्रस्थानत्रयभाष्ये ब्रह्मभिन्नवस्तुविषये अविद्याकल्पितशब्दः आरोपितशब्दः अद्ध्यस्तशब्दः अपरमार्थशब्दः अविद्याप्रत्युपस्थापितशब्दः अविद्योपाधिकशब्दः मायिकशब्दः मायामयशब्दः मिथ्याशब्दः मृषाशब्दः कल्पितशब्दश्च तत्रतत्रसन्ति-नतेशब्दाः अत्यन्तासत्तुच्छासदर्थपराः तथा अद्वैतिभिरनभ्युपगमात् किन्तुमिथ्यार्थपराः मिथ्यात्वञ्च ब्रह्मतुच्छव्यावृत्तोयः कश्चिद्धर्मः स यथातथावाभवतुतदेतन्मिथ्यात्वं ब्रह्मभिन्नप्रपञ्चादिसत्त्वं कालत्रयेपि अव्यभिचरितास्थितिकत्व-

रूपं ननिरुणाद्धि अन्यथाकारणं ब्रह्म त्रिषु कालेषु सत्त्वन्नव्यभि-
चराति - एवं कार्यमपि जगदिति सत्त्वाच्चापरस्येति भाष्यविरो-
धप्रसङ्गः मतान्तरस्थास्तु अविद्याकल्पितादिशब्दमात्रेण अर्थम-
बुद्ध्वाबिभ्यतीत्यलं ॥ श्रीः ॥

अद्वैतशब्दार्थः कथ्यते - अयंशब्दः नरूढः,कोशादिषुरू-
ढेष्वगणनात् - किन्तुयौगिकः॥ सच शब्दः सलिल एकोद्रष्टा-
द्वैतइतिश्रुतौ परमात्मविशेषणतया श्रूयते।द्वाभ्याम् इतं द्वीतं वस्तु-
यविशिष्टं। प्रतियोग्यनुयोगिवस्तुविशिष्टः अभावः उत्पत्तिविना-
शद्वयविशिष्टः कार्यप्रपञ्चः चिदचिद्द्वयविशिष्टः परमात्मावाद्वी-
तपदार्थः तस्य भावोद्वैतं नविद्यतेद्वैतं यत्र तदद्वैतं। तथाच अद्वैत-
पदेन द्वैतनिषेधमुखेन परमात्माकथ्यते। अभावनिषेधमुखेन पर-
मात्मकथने परमात्माप्रागभावशन्यः-ध्वंसशून्यः प्रपञ्चात्यन्ता-
भावशून्यः प्रपञ्चभेदशून्यश्चेत्यर्थस्स्यात् । तद्धितस्यस्वार्थकत्वपक्षे-
परमात्मासप्रञ्चः - प्रपञ्चभेदनिषेधरूपप्रपञ्चाभेदवान् - परमा-
त्मेति सेत्स्यतिः नतु निष्प्रपञ्चं ब्रह्मजडभिन्नं ब्रह्मेत्यर्थसिद्ध्येत्।
तद्धितस्य भावार्थत्वपक्षे अद्वैतपदेन अभावत्व निषेधमुखेन भा-
वरूपं ब्रह्मेति सिद्ध्या शून्यवादप्रतिषेधस्सिद्धोभवति अद्वैतपदेन
उत्पत्तिविनाशद्वयविशिष्टकार्यप्रपञ्चनिषेधमुखेन ब्रह्मप्रतिपा -
दने कार्यप्रपञ्चशून्यं कार्यप्रपञ्चत्वशून्यं वा ब्रह्मेतिस्यात् । कार-
णमायादिप्रपञ्चनिषेधो ब्रह्मणि नसिद्ध्यति। अद्वैतपदेन चिद-
चिद्द्वयविशिष्टत्वस्य भावार्थतद्धितार्थयुक्तस्य निषेधेचिदचि-
द्विशिष्टत्वशून्यं ब्रह्मेतिस्यात् - तदानीं चिदचिद्विशिष्टं ब्रह्मन

सिद्ध्यति।स्वार्थतद्धितपक्षे चिदचिद्विशिष्टंब्रह्मब्रह्मणिनिषेद्ध्यमि-
त्यागतं नद्वैतम् - अद्वैतम्-इतिसमासकरणमेवोचितं बहुव्रीहिपक्षे
पदद्वयलक्षणापत्त्या असुखमितिपदे दिनकरभट्टियोक्तरीत्यानञ्-
समास एवोचितः। तदानीं हि अभावभिन्नं वा कार्यप्रपञ्चभिन्नं
वा चिदचिद्द्विद्विशिष्टभिन्नं वा ब्रह्मेत्यर्थः पर्यवस्यति । चिद-
चिद्द्वयविशिष्टभिन्नत्वसिद्धौ अन्यतरविशिष्टत्वं पर्यवस्यति नतु
चिदचिद्द्वयविशिष्टं ब्रह्मेति । द्विधाइतं द्वीतं। तस्य भावः द्वैतं।
द्वैधीभावः द्वैतं नविद्यते यत्र तदद्वैतमिति ब्रह्मानन्दाद्युक्तरीत्या
अद्वैतपदार्थस्वीकारे ब्रह्मणः द्वैधीभावः नास्ति—सर्वधर्मवैशिष्ट्यं
ब्रह्मणि संभवत्येव ब्रह्मानन्दोक्तरीत्याश्रयणेनाद्वैतविशिष्टाद्वैत-
मतविरोधः। तस्मिन् पक्षे द्विशब्दस्य द्विधेतिभावार्थकल्पनमेव
दोषः ॥ श्रीः ॥

अद्वैतिमते पारमार्थिकसत्त्वं ब्रह्ममात्रवृत्ति, व्यावहारिक-
सत्त्वं प्रपञ्चमात्रवृत्ति - ब्रह्मप्रपञ्चोभयानुगतं सत्त्वं ब्रह्मप्रपञ्चै-
क्यात्मकं प्रातिभासिकशुक्तिरूप्यरज्जुसर्पदेवमनुष्याद्याकार -
निष्ठभासमानात्मवृत्तित्वसाधारणं प्रातिभासिकमात्रवृत्तिप्रा -
तिभासिकसत्त्वमिति सत्ता चातुर्विद्ध्यमस्तीत्यत्र अभ्युपगम्य
चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागं स्याल्लोकवदिति-
परिहारोभिहितः।नत्वयं विभागः परमार्थतोऽस्तीत्यारम्भणाधि-
करणोपक्रमभाष्यं यथा च कारणं ब्रह्मत्रिषुकालेपु सत्त्वं नव्य-
भिचरति एवं कार्यं जगत् त्रिषुकालेषु सत्त्वं नव्यभिचरति एकं
हि पुनस्सत्त्वमतः कारणात् कार्यस्यानन्यत्वमिति सत्त्वाच्चापर-

स्येति सूत्रभाष्यं दृश्यते हि सत्तालक्षणो ब्रह्मस्वभावः आका-
शादिष्वनुवर्तमान इत्युक्तमिति दृश्यतेत्विति सूत्रभाष्यं अन्यो-
न्यस्मिन्नन्योन्यात्मकताम् अन्योन्यधर्मां श्चाध्यस्य न चानद्धय-
स्तात्मभावेन देहेनकश्चित् व्याप्रियते-इत्याद्यद्धयासभाष्यं बाध्य-
न्ते चैते स्वप्नदृष्टाः प्रबोधइति वैलक्षण्याच्च न स्वप्नादिवदितिसूत्र-
भाष्यम्।एवम्।अन्यदपि भगवत्पादभाष्यम्।एवं जातीयकं प्रमा
णं।पारमार्थिकत्वरूपसत्वेनप्रपञ्चत्वव्यधिकरणेनकृत्स्नप्रपञ्चस्या-
पि ब्रह्मण्यभावप्रतियोगित्वं मिथ्यात्वं ब्रह्मभिन्नकृत्स्नप्रपञ्चस्य
विशिष्टाद्वैतिमतेतु सत्यपदं निरुपाधिकसत्तायोगि ब्रह्म आहेत्या-
दिजन्माद्यधिकरणविशिष्टाद्वैतिभाष्येण ब्रह्मणः निरुपाधिकस-
त्त्वं प्रपञ्चस्य सोपाधिकसत्त्वमङ्गीकृतं प्रपञ्चस्य अनाशीपरमार्थ-
श्चप्राज्ञैरभ्युपगम्यते - तत्तु नाशि न संदेहोनाशिद्रव्योपपादित-
मित्यादिविष्णुपुराणश्लोकव्याख्यानप्रकरणे विनाशित्वस्य वि
शिष्टाद्वैतभाष्येमिथ्यात्वरूपत्वोक्तेः कृत्स्नप्रपञ्चस्य विनाशि -
त्वरूपं मिथ्यात्वमङ्गीकृतं - विशिष्टाद्वैतिभाष्ये प्रपञ्चस्यापि स-
त्यशब्दमुख्यार्थत्वे सत्यशब्दाभिधेयश्च परं ब्रह्मसत्यशब्दनिर्दि-
ष्टमेव भूमेति सत्याख्यं परं ब्रह्मैवभूमेत्युपदिश्यतइति सत्यश-
ब्दाभिधेयं परंब्रह्मप्रतीयते ॥ श्रीः ॥

सत्यशब्दश्च - सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिषु परस्मिन्
ब्रह्मणि प्रयुक्तइत्यादीनि भूमाधिकरणवाक्यानि ब्रह्मभिन्नकृत्स्न-
प्रपञ्चस्य सत्यत्वप्रतिकोटिमिथ्यात्वं ज्ञापयन्ति। मध्वमते तत्त्व-
विवेकतत्त्वसंख्यानादिभाष्यकारकृतग्रन्थेस्वरूपप्रमितिप्रवृत्तिरूप-

सत्तात्रैविद्धये परानपेक्षं स्वतन्त्रतत्त्वं तत्र परापेक्षम -
स्वतन्त्रंतत्त्वमित्यादिलेखनेन परानपेक्षसत्ताकत्वं ब्रह्मणः त-
द्भिन्नकृत्स्नप्रपञ्चस्य परापेक्षसत्ताकत्वमिति सत्ताद्वैविध्यमुक्तम्
एवं त्रिष्वपि मतेषु प्रपञ्चब्रह्मणोः विलक्षणसत्त्वाङ्गीकारसा-
म्येपि अद्वैतिनं सत्ताचातुर्विध्यवादिनम् असत्यवादीति वदन्तः
तत्तद्भाष्यादिग्रन्थार्थप्रच्छादनेन जगत् व्यामोहयन्ति - किञ्च-
मध्वमते - शुक्तिरूप्य रज्जु सर्पादीनामत्यन्तासत्त्वं शश शृङ्गव-
दभ्युपगम्यते विशिष्टाद्वैतिमते देवोहं मनुष्योहमिति भ्रमेभास-
मानस्य देवमनुष्याद्याकारे आत्मनिष्ठत्वस्य असत्त्वमुच्यते
रज्जु सर्पशुक्तिरूप्यादीनां देवोहं मनुष्योहमिति भास -
मानदेवाद्याकारनिष्ठाहमर्थात्मनिष्ठत्वस्य च प्रातिभासिक -
पदार्थोत्पत्तिमङ्गीकृत्य प्रातिभासिकसत्तामङ्गीकृतवतां अद्वैति-
नाम् असत्यवादित्वेन परैः अभिहितं दूषणं कथं संगच्छेत
सत्यवादिनां मध्ये अद्वैतिनएव सर्वसत्यत्वाङ्गीकारात् श्रेष्ठा इति
सुधियोविदांकुर्वन्तु ॥ श्रीः ॥

विनायकब्राह्म्यादि चामुण्ड्यन्तमातृगणचतुर्भगिन्या -
दीनां भूतत्वमित्यत्र भूतानि विनायकमातृगण चतुर्भगिन्या-
दीनि भूतेज्याः भूतानां पूजकायान्तीति - यान्ति देवव्रता देवान्
पितन् यान्ति पितृव्रताः । भूतानि यान्ति भूतेज्यायान्ति मद्या-
जिनोपि मामिति गीताश्लोकभाष्यं प्रमाणम्। उक्तमातृगणादीनां
याजकस्य तामसत्वमित्यत्र - प्रेतान् भूतगणांश्च सप्तमातृकादींश्च
अन्येयजन्ते - तामसाजनाइति यजन्ते सात्त्विकादेवान् यक्षर-

क्षांसिराजसाः । प्रेतान् भूतगणांश्चान्येयजन्ते तामसाजनाइति
गीताश्लोकभाष्यं प्रमाणं तामसानामधोगतिरित्यत्र । जघन्य-
गुणतमोनिष्ठाः मूढा अधोगच्छन्ति पश्वादिषूत्पद्यन्तइति। ऊर्ध्वं
गच्छन्ति सत्त्वस्थामध्येतिष्ठन्ति राजसाः । जघन्यगुणवृत्तिस्था
अधोगच्छन्तितामसाइति गीताश्लोकभाष्यं प्रमाणं - चतुर्भ-
गिनी - चतुर्णांभगिनीदुर्गा - स्वस्राम्बिकयातं जुषस्वेति-तैत्ति-
रीयश्रुतिः दुर्गायाश्शिवभगिनीत्वे श्रीरामायणबालकाण्डगङ्गा-
वतरणप्रकरणं तस्या गङ्गाभगिनीत्वे - वासुदेवस्य भगिनीति।
विराटपर्वतृतीयाध्याययुधिष्ठिरकृतदुर्गास्तववचनं वासुदेवभ-
गिनीत्वे-गोपेन्द्रभगिनीत्वे भीष्मपर्वत्रयोविंशाध्यायगतार्जुनकृत-
दुर्गास्तवीयगोपेन्द्रस्यानुजेतिवचनं प्रमाणं। नैवं चतुर्भ-गिनीत्वम्
अन्यस्याः कुत्रचिदपि प्रमाणग्रन्थे लिखितमस्ति । उमा दुर्गा-
पार्वत्यादिशब्दाः पर्यायाइति सुप्रसिद्धम् । नव्यद्वैतिनः एकं
चैतन्यम् उपाधिना जीवेश्वररूपाभ्यां भिन्नमित्यत्र प्रसिद्धश्रुति-
स्मृतिसूत्रेषु नकिमपि प्रमाणमुपलभ्यते प्रत्युतजीवब्रह्मभेदस्य
औपाधिकत्वबाधकं स्वाभाविकत्वबोधकं विद्वान्नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैतिदिव्यम्। आब्रह्मभवनाल्लोकाः पुनरावर्तिनो-
र्जुन । मामुपेत्यतु कौन्तेय पुनर्जन्म नविद्यते । पूतात्मा परमा-
त्माच मुक्तानां परमागतिः । मुक्तोपसृप्यव्यपदेशाच्चेति मुण्डक-
श्रुतिर्गीतानामसहस्रब्रह्मसूत्रान्तर्गतवचनानि मोक्षदशायामपि
कर्मकर्तृव्यपदेशाच्चेति सूत्रोक्तरीत्या मुक्तब्रह्मणोः कर्मकर्तृभावेन
भेदसमर्पकाणि जीवब्रह्मभेदस्य औपाधिकत्वन्निवारयन्ति स्वा-
भाविकत्वं कथयन्तीतिनिष्प्रत्यूहं । मुक्तिदशायामुपाधेर्विनाशेन

औपाधिकभेदस्याप्रसक्तेः । उदाहृतमुण्डकश्रुतिसूत्रयोः अद्वैत-
भाष्येऽपि परममुक्तिविषयतया योजनेनापेक्षिकापरविद्याधीन-
मुक्तिविषयत्वास्वीकारात् । यत्तु अग्निर्यथैको भुवनं प्रविष्टो रूपं
रूपं प्रतिरूपो बभूव।एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रति-
रूपो बहिश्चेति कठवल्लीवाक्येन परमात्मनोऽपि जीवेश्वरभेदेन
औपाधिकभेदोऽवगम्यत इति; तन्न,नहि रूपंरूपमित्येतद्घटकरू-
पपदमन्तःकरणपरं मायापरं नतु गिरिनदीसमुद्रघटपटकु-
ड्यादिपरमिति निर्बन्धे प्रमाणमस्ति। नामरूपे व्याकरवाणि सं-
ज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशादिति श्रुतिसूत्रानुसारेण वी-
प्साविषयरूपशब्दस्य घटपटादिमूर्तिसामान्यपरतया घटपटादि
सर्वप्रतिरूपत्वस्यैव कथनेन भवदभिमतान्तःकरणमायामात्रप्राति-
रूपत्वाख्यजीवत्वेश्वरत्वबोधकत्वाभावात् । वस्तुतस्तु रूपपदं प्र-
कृते जीवपरं।सर्वभूतान्तरात्मेतिपदेन सर्वजीवान्तर्यामिणं गृहीत्वा
तस्यान्तर्यामिणः स्वनियम्यतत्तज्जीवरूपमुपाधीकृत्यौपाधिको-
ऽन्तर्यामिभेदः तद्वाक्येन प्रतिपाद्यते सर्वभूतान्तरात्मेति निय-
न्त्रन्तर्यामिबोधकपदसमभिव्याहारसामर्थ्येन रूपंरूपमित्युपा -
धिबोधकपदस्य नियम्यस्वरूपजीवाख्योपाधिपरत्वावश्यक -
त्वात् । बृहदारण्यकोपनिषत्सु तृतीयाध्याये सप्तमब्राह्मणे य-
स्सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरोऽयं सर्वाणि भूतानि
न विदुः यस्सर्वाणि भूतान्यन्तरो यमयति एषते आत्मा अन्त-
र्यामीत्यत्र सर्वभूतान्तरात्मनः यमयितृत्वान्तर्यामित्वादेः कण्ठत
एव कथनेन नियम्यसर्वभूतानां न विदुरिति समभिव्याहारात्
चेतनत्वावगमेन च सर्वभूतान्तरात्मा नियन्त्रन्तर्याम्येव तन्नि-

यम्यसर्वजीवा एव सर्वभूतानि रूपं रूपमित्युपात्तानि नत्वन्तःकरणानि-माया वा जीवेश्वरोपाधयः रूपंरूपमिति शब्दिता अत्रासंशब्दिततत्वादनुपस्थितत्वाच्च तेषां। यत्तु याज्ञवल्क्यस्मृतौ आकाशमेकं हि यथा घटादिषु पृथग्भवेत्।तथात्मैकोऽप्यनेकस्थो जलाधारेष्विवांशुमानिति वचनं जीवब्रह्मणोरौपाधिकभेदे प्रमाणमिति;तन्न,घटादिषु एकमाकाशं यथा पृथग्भवेत् स्थितिं पृथक्प्राप्नुयात् भवेदिति स्थाने दार्ष्टान्तिके अनेकस्थ इति स्थितिनिर्देशात्।तथा एक आत्मा अनेकस्थः पृथिव्यादौ स्थितिं प्राप्त इति प्रथमदृष्टान्तदार्ष्टान्तिकभागार्थः। तथाचाकाशवत् अनेकवस्तुषु स्थितिरात्मनः प्रतीयते न त्वौपाधिको भेदः। द्वितीयदृष्टान्ते साधारणधर्मवाचिपदस्यापेक्षितत्वात् स्थ इति पदमनुषञ्जनीयं। नतु प्रतिविम्बते इति पदमध्याहर्तव्यं अनुषंगसंभवे अध्याहारस्यानुपस्थितपदकल्पनरूपस्यायुक्तत्वात्। जलेष्वित्यनुक्त्वा जलाधारेष्वित्युक्त्या च प्रतिबिंबत इति नाध्याहर्तव्यमिति प्रतीयते जले एव सूर्यस्य प्रतिबिम्बः न जलाधारेषु। अतः जलाधारेषु मेघेषु यथा अंशुमान् अवतिष्ठते एकोऽपि तथा आत्मा अनेकेषु अवतिष्ठत इति अनेकत्र स्थितिरेवोक्ता नत्वौपाधिकः प्रतिबिम्ब-एकस्यानेकत्रावस्थित्यसंभवाशंङ्कानिराकरणपरमिदं वचनं। यदपि रूपंरूपं प्रतिरूपो बभूव,तदस्य रूपं प्रति च क्षणायेति वाक्यं। तदपि पूर्वोदाहृतकठवल्लीवाक्यवत् नियम्यतत्तज्जीवोपाधिकान्तर्यामिभेदपरं। तत्समानाकारत्वात्। यदपि कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इति वचनं,तदपि न जीवस्य उपाध्यवच्छिन्नचैतन्यत्वरूपजीवत्वे प्रमाणम्। उक्तवचनरीत्या कार्यो-

पाधिकत्वविशिष्टचैतन्यस्य जीवत्वापत्त्या जीवस्य जीवत्वेन श्रुतिस्मृतिन्यायसिद्धानादित्वभंगापत्तेः। किन्तु जीवस्यैव सतबहुव्रीहिसमासेन कार्यभौतिकशरीराख्योपाधिसंबन्ध उच्यते-ईश्वरस्यैव सतः मायाख्यकारणात्मकशरीरोपाधिसंबन्ध उच्यते। मायाह्येषा मया सृष्टा यन्मां पश्यसि नारद। सर्वभूतगुणैर्युक्तं मैवम्मां ज्ञातुमर्हसीति मोक्षधर्मनारायणीयविश्वरूपशरीरप्रदर्शक भगवन्नारायणवचनप्रामाण्यात्। यदपि प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासादिति सूत्रं जीवब्रह्मणोरौपाधिकभेदपरम्, अङ्गुल्याद्युपाधिषु प्रकाशादिवत् प्रकाशस्वरूप आत्मा कर्मणि उपाधिष्वित्यतः सौरादिप्रकाशादीनामिव औपाधिक एव आत्मभेद इत्यविशेषः तत्वमसीति जीवब्रह्मैक्याभ्यासादिति सूत्रार्थ इति तदपि न सूत्रे उपाधिबोधकपदाभावात्।कर्मणीति पदस्य उपाधिपरत्वन्तु साहसकृत्यम्। अत एव भाष्यव्याख्याने रामानन्दीये कर्मणीत्यस्य उपासनाख्यकर्मणीति व्याख्या। नहि कस्मिन्नपि सूत्रे जीवेश्वरयोरौपाधिकभेदप्रयोजकोपाधिः दृश्यते येन तयोस्सूत्रकृन्मते औपाधिकभेदस्सिध्येत्। सूत्रस्य तु कर्मण्यभ्यासादिति समभिव्याहारेण कर्मण एवाभ्यासः। तथाच ब्रह्मोपासनकर्माभ्यासे ते प्रकाशादिधर्मवत् धर्मान्तरस्य चकारसमुच्चितस्य ब्राह्मस्य प्रकाशः भवतीति अस्मिन्नर्थे विशेषो नास्तीति स्वारसिकार्थः। यत्तु भारते मोक्षधर्मे षट्त्रिंशदधिकद्विशततमेऽध्याये चतुर्लक्षणजन्त्वाद्यं चतुर्वर्गं प्रचक्षते। व्यक्तमव्यक्तजश्चैव तथा बुद्धमचेतनामिति एकाधिकत्रिंशश्लोके चतुर्ल-

क्षणं जन्मवृद्धिजीर्णतामृतिविकारवत् महदहंकारपञ्चतन्मात्रैका-
दशेन्द्रियपञ्चभूतं तज्जं तदुपाधिकं चतुर्वर्गार्थिनं व्यक्तं जीवम् अ-
व्यक्तजं मायोपाधिकमीश्वरं तथा तदुभयमपि बुद्धमचेतनञ्च चि-
दचिदात्मकमित्यर्थः इति नीलकण्ठस्य व्याख्यानं तदसमी-
चीनम् । उत्पत्त्यर्थकजमिति पदघटिते तदुपाधिकमित्यर्थकथनस्य
शब्दगतिविरुद्धत्वात्। व्यक्तपदस्य जीवे क्वापि प्रयोगादर्शनाच्च।
चतुर्वर्गपदस्य चतुर्वर्गार्थिनमित्यर्थत्वासंभवाच्च । तथेति पदे
तदुभयमिति व्याख्यानस्योच्छब्दत्वाच्च । चिदाश्रयार्थकस्य
बुद्धपदस्य चिन्मात्रार्थत्वासांगत्याच्च। किन्तु जराय्वण्डस्वेदो-
द्भिदाख्यचतुर्लक्षणादुत्पन्नं चतुर्वर्गं जरायुजाण्डजस्वेदजोद्भिज्जा-
भिख्यं चतुर्वर्गं व्यक्तं वस्तु अव्यक्तजम् अव्यक्तादुत्पन्नं प्रच-
क्षते।अबुद्धं बोधानाश्रयम्। अचेतनं वस्तु च तथा अव्यक्तजं प्रच-
क्षत इति शब्दस्वरसानुगुणः श्लोकार्थः।तस्मादेकस्यैव चैतन्यस्य-
औपाधिको जीवेश्वरभेद इत्यत्र न शास्त्रमस्ति । एवं जीवस्या-
णुत्वावरत्वे स्वाभाविके नत्वौपाधिकमात्रे श्वेताश्वतरोपनिष-
द्गतबुद्धेर्गुणे नात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरश्च दृष्ट इति मन्त्र-
प्रामाण्यात् । आत्मगुणेन जीवात्मस्वरूपगुणेन बुद्धेरन्तःकर-
णस्य गुणेन च प्रथमचकारः बुद्धिगुणात्मगुणसमुच्चयार्थः ।
आराग्रं तोत्राग्रं अवरः अपकृष्टः द्वितीयचकारः आराग्रमा-
त्रत्वावरत्वसमुच्चयार्थः । एवकारः बुध्युपाधिकमेव जीवस्या-
राग्रमात्रत्वमवरत्वञ्च नात्मस्वभावकृतमितिमतव्यवच्छेदार्थकः।
आराग्रमात्र इति मात्रशब्दः मुक्तिदशायामपि जीवस्य महत्त्वव्य-
वच्छेदार्थकः । उभयत्र हिशब्दः वेदलोकप्रसिद्धिद्योतकः । दृष्ट-

शब्दः तत्वदर्शिभिः दृष्ट इत्यर्थकः । एतन्मन्त्रसामर्थ्यादेवार्था-
दीशस्य स्वाभाविकमहत्त्वपरत्वे न त्वौपाधिकमात्रे इत्यपि सि-
ध्यति ॥ एवं मोक्षधर्मे षट्त्रिंशदधिकद्विशततमाध्याये द्वावा-
त्मानौ च वेदेषु सिद्धान्तेष्वप्युदाहृताविति त्रिंशत्तमश्लोके वेद-
मते सांख्यादिमतेऽपि जीवः परमात्मेति द्वावात्मानाविति शु-
कस्य व्यासोपदेशेन आत्मैक्यपक्षः न व्यासाभिमत इति सि-
ध्यति । एवं मोक्षधर्म एव पञ्चाशदधिकत्रिशततमाध्याये
बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु । को ह्यत्र पुरुषश्रेष्ठः को
वा योनिरिहोच्यत इति जनमेजयप्रश्नश्लोकः । तत्र पुरुषबहु
त्वैकत्वविषयः प्रथमप्रश्नः। पुरुषाणाम्मध्ये श्रेष्ठपुरुषविषयः द्वि-
तीयः प्रश्नः। पुरुषाणां योनिपुरुषविषयस्तृतीयः। द्वितीय तृतीय-
प्रश्नौ प्रथमप्रश्नीयपुरुषबहुत्वकोटयवलंबिनौ । पुरुषैकत्वको-
टयवलंबित्वे एकपुरुषे तत्पुरुषनिरूपितश्रैष्ठ्ययोनित्वविषयक-
त्वासंभवात् ।यत्तु को ह्यत्र पुरुषश्रेष्ठः को वा योनिरिहोच्यत इ-
त्यस्य न प्रश्नद्वयपरत्वं।किन्तु किंशब्दद्वयमाक्षेपार्थं न प्रश्नार्थे।श्रे-
ष्ठः पुरुषः कः कोऽपि नास्ति योनिः पुरुषः कः कोपि नास्ती-
त्यर्थं इति नीलकण्ठव्याख्यानं। तन्मन्दं।बहवः पुरुषा राजन् सां-
ख्ययोगविचारणे । नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह ।
बहूनां पुरुषाणां हि यथैका योनिरुच्यते । तथा तं पुरुषं वि-
श्वमाख्यास्यामि गुणाधिकम् ॥ इति वैशंपायनीयप्रतिव-
चनश्लोके । बहूनामित्यादिना तथा तं पुरुषमित्यन्तेन बहु-
पुरुषनिरूपितयोनित्वाश्रयपुरुषस्य गुणाधिकामित्यनेन बहुपुरु-
षावधिकगुणाधिक्यरूपश्रैष्ठ्याश्रयपुरुषस्योक्त्या तद्विषयक प्रश्न-

द्वयस्य प्रश्नश्लोकस्थितत्वावश्यकत्वात् । अन्यथा अपृष्टो-
त्तरापत्तेः । प्रश्नाभावे श्रेष्ठयोनिपुरुषविषये योनिश्रेष्ठपुरु-
षस्य प्रतिवक्त्रा अनिरूप्यत्वाच्च। प्रतिवचनगतप्रथमश्लोक-
स्यायमर्थः सांख्ययोगशास्त्रविचारणे कृते बहवः पुरुषाः प्रती-
यन्ते एतच्छ्रैष्ठ्यचयोनित्वाश्रयम् एतदिति सर्वनाम्ना अव्यव-
हितपूर्वस्थितपरामर्शिस्वभावेन अव्यवहितपूर्वस्थितप्रश्नश्लो-
कद्वितीयार्धबोधितश्रेष्ठयोनिपुरुषस्यैव परामर्शनीयत्वात् । तथा
च एतत् श्रेष्ठत्वयोनित्वविशिष्टमेकं पुरुषं सांख्ययोगशास्त्र-
निष्ठाः नेच्छन्तीति । एतेन वेदार्थविचारे पुरुषबहुत्वं श्रेष्ठपुरुषो
योनिपुरुषश्चाङ्गीकृतौ वैदिकैरिति अर्थात्सिद्धं प्रतिवचनीयद्विती-
यश्लोके बहूनां पुरुषाणामित्यस्य चतुर्मुखरुद्रादिबहुपुरुषाणा-
मित्यर्थः । एतदुपाख्यानान्ते चतुर्मुखरुद्रादिपुरुषयोनित्वस्य
कथनात् । यथाशब्दस्य येन प्रकारेणेत्यर्थः । तथाशब्दस्य
तादृशप्रकारविशिष्टमित्यर्थः। नमस्कृत्वा च गुरवे व्यासायामित-
तेजसे।इदं पुरुषसूक्तं हि चतुर्वेदेषु पठ्यते। ऋतं सत्यञ्च विख्यात-
मृषिसिंहेन चिन्तितं । ऋषिसिंहेन व्यासेन उत्सर्गेणापवादेन
ऋषिभिः कपिलादिभिः । अद्ध्यात्मचिन्तामाश्रित्य शास्त्राण्यु-
क्तानि भारत । समासतस्तु यद्व्यासः पुरुषैकत्वमुक्तवान् । त-
त्तेऽहं संप्रवक्ष्यामि प्रसादादमितौजसः । समासतः व्यवधा-
नरहितसंश्लेषेणोक्तसंश्लेषाभिन्नं पुरुषैकत्वं पुरुषाणा-
मैक्यमुक्तवान् ॥ नतु स्वरूपैक्यं समासत इति पदवैयर्थ्या
पत्तेः । राजपुरुष इत्यादौ पदयोः विभक्तिव्यवधानराहित्यवि-
शिष्टसंश्लेषे समासपदप्रयोगात् । ते तुभ्यं अमितौजसः अपरि-

मितज्ञानशक्तेः व्यासस्य प्रसादात् संप्रवक्ष्यामि सम्यक्प्रक-
र्षेण वक्ष्यामि। अत्राप्युदाहरन्तीममितिहासं पुरातनं । ब्रह्मणा-
सह संवादं त्र्यंबकस्य विशांपते।स्पष्टं ब्रह्माणं प्रति रुद्र उवाच।
बहवः पुरुषा ब्रह्मन् त्वया सृष्टा स्वयंभुवा।सृज्यन्ते चापरे ब्रह्मन्
सचैकः पुरुषो विराट्।कोह्यसौ चिन्त्यते ब्रह्मं स्त्वयैकः पुरुषोत्तमः।
ब्रह्मोवाच।बहूनां पुरुषाणां सः यथैका योनिरुच्यते । तथा तं पु-
रुषं विश्वंपरमं सुमहत्तमं।निर्गुणं निर्गुणाभूर प्रविशन्ति सनातनं
प्रवक्ष्यामीति शेषः।अद्ध्यायः । ब्रह्मोवाच । शृणु पुत्र यथाह्येष
पुरुषश्शाश्वतोऽव्ययः।अक्षयश्चाप्रमेयश्च सर्वगश्च निरुच्यते। न स-
शक्यस्त्वया द्रष्टुं मयान्यैर्वापि सत्तम।सगुणोनिर्गुणोविश्वो ज्ञानदृ-
श्यो ह्यसौ स्मृतः। अशरीरश्शरीरेषु सर्वेषु निवसत्यसौ। वसन्न-
पि शरीरेषु न स लिप्यति कर्मभिः।ममान्तरात्मा तवच ये चान्ये-
देहिसंज्ञिताः।सर्वेषां साक्षिभूतोसौ न ग्राह्यः केन चित्क्वचित्।मम
चतुर्मुखस्यतवरुद्रस्य अन्तरात्मा अन्तर्यामी।तेनविधिशिवापेक्षया
अन्तर्यामी भिन्न इति सिद्ध्यति।तस्यैकत्वम्महत्वञ्च सचैकः पुरु-
षस्स्मृतः । महापुरुषशब्दं सः बिभर्त्येकस्सनातनः ।एकः मुख्यः
महापुरुषशब्दं सः बिभर्त्तीत्यनेन तद्भिन्नाः विधिशिवादयः देहि-
संज्ञिताः महत्त्वहीनपुरुषाइति सिद्ध्यति । पुरुषबहुत्वञ्च संसू-
च्यते । पुरुषबहुत्वाभावे महत्त्वविशेषणेन व्यावर्तनीयपरिच्छिन्न-
पुरुषाभावात् । मुहापुरुष इति निर्देशानुपपत्तेः । जडव्यावर्तकं
महत्वमिति न संगतं । पुरुषपदेन चेतनवाचिना तद्व्यावृत्ति-
सिद्धेः । एको हुताशो बहुधा समिद्ध्यत एकस्सूर्य्यस्तपसो यो
निरेकः। एको वायुर्बहुधा वाति लोके महोदधिश्चाप्यंभसांयोनिरे-

कः तवान्तरात्मा इत्यादिना विधिशिवान्तर्यामित्वमुक्तं । तदेकस्य
महापुरुषस्य कथं संभवति एकस्य सर्वान्त र्वृत्तित्वासंभवादिति
शंकापरिहाराय आह - एको हुताश इत्यादि। एकोऽपि हुताशः
तत्तत्काष्ठेषु समिद्ध्यमानः काष्ठोपाधिकं बहुभावं गच्छति तप्यते
प्रकाश्यते अनेनेति तपः। बहुत्वाश्रयश्चक्षुः तस्य तपसः योनि-
रनुग्राहकः एकस्सूर्यः। अनुग्राह्यभेदेनानुग्राहकःबहुभावं गच्छति।
एको वायुः वाह्यवृक्षादिवस्तुभेदेन बहुभावं गच्छति । अंभसां-
योनिः एकः महोदधिः स्वसंबद्धप्राच्यादिदेशभेदात् पूर्वसमुद्रो
दक्षिणसमुद्रः पश्चिमसमुद्र इति बहुभावं गच्छति । पुरुषश्चैको-
निर्गुणो विश्वरूपः तं निर्गुणं पुरुषं चाविशन्ति । निर्गुणः
वक्ष्यमाणरीत्या सर्वदा निर्गुणः । एकः पुरुषः अन्तरात्म-
भूतः । पुरुषः विश्वरूपः यदपेक्षया पुरुषस्यान्तरत्वं ममान्त-
रात्मेत्यादिनोक्तं तत्तत् विधिशिवादितत्तद्रूपप्रतिसंबन्धिभेदात्
विश्वरूपः नानास्वरूपः। तथा च नियम्यविधिशिवादिरूपोपा-
धिभेदात् सर्वान्तरात्मत्वं परमात्मन उपपन्नमिति भावः।यत्तु
परमात्मनः एकस्य पुरुषस्यान्तःकरणाद्युपाधिभेदात् जीवेश्वर-
भेदेन नानाविधपुरुषत्वं एको हुताश इत्यादिदृष्टान्तैर्विवक्षित-
मिति तन्न।अतैव निर्गुणं निर्गुणा भूत्वा प्रविशन्तीत्यस्मिन् निर्गु-
णा इति बहुवचनपदोक्तानां मुक्तजीवानां बहुवचनेन परस्परं-
भेदस्य निर्गुणं प्रविशन्तीति मुक्तजीवानां प्रवेशकर्तृत्वस्य निर्गुण-
परमात्मनः प्रवेशकर्मत्वस्योक्त्या कर्मकर्तृव्यपदेशादिति न्यायेन
मुक्तजीवपरमात्मभेदस्य च सिद्ध्या मुक्तानामुपाधिनाशे सति
परस्परं ब्रह्मणा च औपाधिकभेदासंभवात् तद्भेदस्य पारमार्थि-

कत्वावश्यकतया उपाधिना जीवब्रह्मभेदस्वीकारस्य भक्षितेऽपि
लशुने न शान्तो व्याधिरिति न्यायेन निष्प्रयोजनत्वात्। तं नि-
र्गुणं पुरुषश्चाविशन्तीत्युक्तं।किन्तत् निर्गुणत्वमित्यतस्तन्निर्वक्ति।
हित्वा गुणमयं सर्वं कर्म हित्वाशुभाशुभं।उभे सत्यानृतेत्यक्त्वा एवं
भवति निर्गुणः । गुणमयसर्वकर्मशुभाशुभसत्यानृतहीनत्वं निर्गु
णत्वमिति यावत्।एवं हि परमात्मानं केचिदिच्छन्ति पण्डिताः।
एकात्मानं तथात्मानमपरे ज्ञानचिन्तकाः। एवं हि विराड्रूपं
हि एकात्मानं मुख्यात्मानम् आत्मानं जीवात्मानं। ननु निर्गुण-
त्वस्य जीवब्रह्मसाधारण्ये जीवात्मपरमात्मनोः को विशेष इत्यत
आह।तत्र यः परमात्मा हि सः नित्यं निर्गुणः स्मृतः।तत्र निर्गुण-
योः मुक्तजीवपरमात्मनोर्मध्ये परमात्मा हि परमात्मेति प्रसिद्धः
सः नित्यं निर्गुणः । तेन जीवस्य निर्गुणत्वं परमात्मानुसन्धा-
नाधीनं मुक्तिकालमात्रभावि। परमात्मनस्तु अन्यानधीनं सार्व-
कालिकमिति सिद्ध्यति । अन्यानधीनसार्वकालिकनैर्गुण्याश्रयः
परमात्मा किंरूप इत्यत आह।स हि नारायणो ज्ञेयस्सर्वात्मा पुरु-
षो हि सः । एतेन परमात्मानमनूद्य नारायणत्वविधानात् ना-
रायणभिन्नानां परमात्मत्वन्नास्तीति स्पष्टमवगम्यते। न लिप्यते-
फलैश्चापि पद्मपत्रमिवांभसा। स्पष्टं । कर्मात्मा त्वपरो योऽसौ
मोक्षबन्धैस्स युज्यते। स सप्तदशकेनापि राशिना युज्यते च सः।
कर्मात्मा पुण्यपापरूपकर्मयुक्तात्मा अपरः परमात्मभिन्नपुरुषः।
सप्तदशकेन राशिना लिङ्गशरीरेण।बहवः पुरुषा इत्युपक्रान्तं पुरु-
षबहुत्वमुपसंहरति। एवं बहुविधः प्रोक्तः पुरुषस्ते यथाक्रमं।एव-
वं जीवात्मपरमात्मभेदेन बहुप्रकारः पुरुषः हे रुद्र ते तुभ्यं प्रोक्त-

दिति वचनमपि न जीवेशयोरौपाधिकभेदं वक्ति भूतात्मश-
ब्दितस्य जीवस्यैव भूताभूतव्यवस्थितिभेदेन एकत्वनानात्वोक्तेः।
जलचन्द्रवदिति दृष्टान्तानुसारेण दार्ष्टान्तिके जलचन्द्रस्थानीय-
स्य भूतात्मनः चन्द्रस्थानीयत्वाभावेन ईशत्वासंभवेन जीवत्वा-
वश्यकतया केवलात्मनि औपाधिकजीवेश्वरभेदपरत्वानुपपत्ते-
रित्याहुः- नव्या द्वैतिनस्तु उदाहृतश्रुतिस्मृतिसूत्रादिभिः जीवे-
श्वरयोर्भेदस्य औपाधिकत्वासिद्धावपि श्रीभागवते-प्रमाणसारभू-
ते-प्रथमश्लोके यत्र त्रिसर्गो मृषा धाम्ना स्वेन सदा निरस्तकुहकं
सत्यं परं धीमहीत्यत्र जगन्मिथ्यात्वमुक्तं - अन्त्याध्यायश्लोके
सर्ववेदान्तसारं यत् ब्रह्मात्मैकत्वलक्षणं । वस्त्वद्वितीयं तन्निष्ठं
कैवल्यैकप्रयोजनमित्यत्र जीवेश्वरयोः स्वरूपैक्यमुक्तं। सप्तमस्कन्धे
यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुख-
श्रीरिति जीवेशयोरौपाधिकत्वाविनाभूतः बिम्बप्रतिबिम्बभावः
कथितः। तृतीयस्कन्धे।। नैकात्मतां मे स्पृहयन्ति के चिन्मत्पाद-
सेवाभिरतामदीहाः।येऽन्योऽन्यतो भागवताःप्रसज्ये सभाजयन्ते
मम पौरुषाणीति कपिलवासुदेवेन जीवब्रह्मणोः स्वरूपैक्यं
बहुमहर्षिसम्मतं।तयोर्भेदस्तु केषाञ्चिदेवाभिमत इति केचिदित्य-
नेनास्वरसस्सूचकेन कथितः। एकादशस्कंधे यस्मिन्निदं सदसदा-
त्मतया विभाति मायाविवेकविधुतिः स्रजि वाहिबुद्धिः। तं नित्य-
मुक्तपरिशुद्धविबुद्धतत्वं प्रत्यूढकर्मकलिलं प्रकृतिं प्रपद्ये - इति
जगतो मायामयत्वं ज्ञाननिवर्त्यत्वं रज्जुसर्पनिदर्शनपूर्वकमुक्तं।

तत्रैव-न तत् पुरस्तादुत यन्न पश्चात् मध्ये च तन्न व्यपदेशमात्र-
मिति जगतस्त्रैकालिकनिषेधप्रतियोगित्वमुक्तम् ॥

एवं श्रीभागवते कृत्स्नोऽपि ग्रन्थः अद्वैतानुसार्येव वर्तते

अतस्तदनुसारेण श्रुतिस्मृतिसूत्रार्थाः वर्णनीयाः

इति प्राहुरित्यलम्.

समाप्तोऽयं गन्थः.

श्रीः.

शुद्धाशुद्धपत्रिका.

पृष्ठं	पङ्क्ति	अशुद्धं	शुद्धं
१	१०	भष्य	भाष्य
१५	७	यावन्ता	यावत्ता
,,	१५	टाद्य	टाद्यु
,,	२१	अपगत	अवगत
१६	१२	ब्राह्मणस्य	ब्राह्मस्य
२४	४	पद्म	त्वद्ध
,,	१४	मोन्तर	मोत्तर
२७	७	कर्त्र	वर्तृ
,,	१७	ऐंश्रीऐं	अधिकं
२९	२	विनाशित्वं	अस्वतन्त्रत्वं
,,	८	साम्यावस्था	शुद्धसत्वप्रधानावस्था
३१	१७	ब्यवहारबाधाः	व्यवहारस्यबाधः
३५	१३	भवन्	भुवि
४०	१३	ईक्ष्यधि	ईक्षित्यधि
४४	८	यवशिष्टं	द्वयविशिष्टं
४६	१८	शीः	अधिकं
,,	२१	ज्ञापयन्ति	किमिति ज्ञापयन्ति
५१	१८	ते	अधिकं
५५	२१	चेतनवासिना	पुरुषपदेनचेतनवाचिना
,,	९	भक्ताः	भक्तः
५८	१९	दा	दो
५९	१२	याव	यावत्
,,	१९	गाता	गीतो
,,	१८	घात	घेति
६०	१५	ज्ये	ज्या